आचार्यगोपालचन्द्रमिश्रग्रन्थमालायाः
चतुर्थं पुष्पम्

द्वितीयं संस्करणम् : २०४७ वि०
मूल्यम् : रू० ६०.००
© सर्वाधिकारो लेखकाधीनः

मुद्रकः
विजयप्रेस
सरसावली, वाराणसी

KĀTYĀYANĪYA-CHANDAH-SŪTRAM

with the Bhaṣyas of Ṣaḍguruśiṣya and Devayājnika

critically edited with an elaborate introduction
'Vaidika-Chandaḥ-Paryāloćanam'
and appendices

by
Dr. SHREEKISHORE MISHRA
Lecturer
Department of Sanskrit
Banaras Hindu University
Varanasi

Professor Gopal Chandra Mishra Publication Series

Fourth Volume

Second edition : 1990

Price : Rs. 60.00

© *Author* : Dr. S. K. Mishra



Printed at

Vijaya Press

Sarasawli, Cantt, Varanasi

PK
387
M5
1990

ASX0653

प्रस्तावना

अथेयमुपायनीक्रियते वेदविदुषां करकमलयोः तत्रभवतो दिगन्त-विश्रान्तयशसः कात्यायनस्य कृतिरिदं छन्दःसूत्रं नामास्मत्प्रीतिभाजनैः विद्याव्रतस्नातकैः डॉ० श्रीकिशोरमिश्रैः सम्पादितम्। यद्यपि कात्यायन-छन्दस्सूत्रं परिशिष्टग्रन्थतया प्रकाशितचरम्, तथापि प्रकृतसंस्करणस्याय-मुत्कर्षो यदत्र षड्गुरुशिष्य-देवयाज्ञिक-भाष्यद्वयेन साकं वैदिकच्छन्दसां विचारसन्दृब्धं पर्यालोचनं प्रकाशपदवीमुपनीयते। भाष्यद्वयमपि गभीर-भावानुबन्धिशब्दैः श्रौतविद्याविचक्षणैराचार्यवर्यैः रचितमिति ग्रन्थमाहात्म्यं स्वत एव प्रतिभासितम्।

छन्दश्शास्त्राध्ययनमन्तराऽपरिमेयान्तःसारे वेदकान्तारे गतिरेवाभ्ये-तृणामसम्भवेति छन्दः पादौ तु वेदस्येत्यादिवचोभङ्ग्या शास्त्रकृद्भिरस-कृत्संलक्षितम्। सर्वोऽपि शब्दराशिश्छन्दोमय इति वेदस्वारस्यम्। छन्दो-निबद्धेन शब्दव्याहरणेन सृष्ट्युत्पत्तिरिति ब्राह्मणग्रन्थेषु 'स भूरिति व्याहरत् तेन पृथिवी अभवत्, स भुवरिति व्याहरत् ततोऽन्तरिक्षमभवत्, स स्वरिति व्याहरत् तेन द्यौरभवत्' इत्यादिना स्पष्टम्। महाव्याहृत्यक्षरव्यूहेन च भूः भुवः स्वः (सुवः) इत्यत्र चतुर्णां पञ्चाक्षरसम्पादनद्वारा पञ्चर्तूनां वसन्त-ग्रीष्म-वर्ष-शरद्-हेमन्तानामुत्पत्तिवर्णनं शतपथश्रुतौ प्रतिपादितम्। यज्ञविधा-वपि छन्दसां प्रयोगे किञ्चिद्विशिष्टं रहस्यपूर्णं प्रयोजनमेवान्तर्गूढमित्युपदिशति भगवती श्रुतिः। तद्यथा—दर्शपूर्णमासयागे गायत्रीच्छन्दस्कामृचं होतानु-वाक्यामनुवदति, यतो हि गायत्री त्रिपदा भवति। पृथिव्यन्तरिक्षद्युभेदेन त्रय एव लोकाः। इमानेव लोकान् गायत्रीच्छन्दस्काया ऋचोऽनुवचनेन देवाः प्रतिष्ठितानकुर्वन्। एवमेव मानुषोऽयं यजमानस्त्रिपदया गायत्र्या त्रीन् लोकान् प्रतिष्ठापयति।

गायत्रीच्छन्दस्कयर्चानुवचनं विधाय त्रिष्टुप्छन्दस्कयर्चा यजति। त्रिष्टुप्छन्दश्चतुष्पादयुक्तं भवति, चतुष्पादाश्च पशवः। अतस्त्रिष्टुभा यजन् यजमानः पशूनेव पृथिव्यादिषु त्रिषु प्रतिष्ठितान् करोति। द्व्यक्षरो वै वषट्कारः, द्विपाद् वै पुरुषः। तस्मात्पुरुषमेव द्विपादमेषु पशुषु

प्रतिष्ठापयति। अथ स्वाहाकारेण वषट्कारेण वा या यज्ञेषु आहुतिर्हूयते सा स्वर्गे लोके अस्य यजमानस्यात्मा (शरीरं) भवति। स यजमानो यदास्माद् भूलोकात् प्रैति तदैतस्य यजमानस्य स्वर्लोके वर्तमाना एषा आहुतिः एनमाह्वयति। यजमानस्याह्वानकारणादेवेयमाहुतिरितिनाम्ना व्यवह्रियत इति शातपथी श्रुतिः। अतश्च यो हि अविदितार्षेयच्छन्दो वाऽध्यापयति वा याजयति, स्थाणुं वच्छंति गर्तं वा निपतति प्रमायुको वा भवतीत्यादिकं शास्त्रवचनं सङ्गच्छते।

तदेतस्य महिमश्रद्धस्य कातीयछन्दश्शास्त्रस्य पर्यालोचनपुरस्सरं भाष्यद्वययुतं प्रकाशनं नूनं वैदिकानां प्रमोदायेति विश्वसिमः। ग्रन्थभूमिकायां विदुषा लेखकेन डॉ० श्रीमिश्रेण छन्दःशास्त्रमधिकृत्य यन्नूतनं विचारजातमाविष्कृतं तन्नितान्तं रमणीयं परिनिष्ठितपाण्डित्यप्रमापकञ्च विद्यत इति स्वयं विदाङ्कुर्वन्तु पाठकाः।

ग्रन्थरत्नमिदं सुधियां लास्यं लभताम्, शास्त्रचर्चायै च कल्पतामित्यनुभावयति।

युगलकिशोरमिश्रः
आचार्योऽध्यक्षश्च
वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

विषयानुक्रमः

वैदिकच्छन्दःपर्यालोचनम् १–३०

छन्दश्शब्दार्थः २, वैदिकदृशा छन्दःस्वरूपम् ३; छन्दसामाच्छादकत्वम् ५, अर्थाच्छादनेन छन्दस्त्वम् ७; छन्दोभ्यः सृष्टिः ८; यजुर्भागस्य छान्दसत्वम् ९; छन्दसां विभागः ११; व्यूहः १४; सन्धिकल्पनात्मकव्यूहः १४; सन्धिविच्छेदमूलकव्यूहः १५; अभ्यासात्मको विशेषव्यूहः १५; व्यूहानुपलब्धौ विशेषसंज्ञा १६; व्यूहसाङ्कर्ये नियमः १६; प्रपदमुच्चारणम् १६; वैदिकदृष्ट्या गायत्रीस्वरूपविमर्शः १७; छन्दस आधिदैविकं स्वरूपम् २२; याजुषच्छन्दसां भेदविवेकः २४।

कात्यायनीयछन्दःसूत्राणि (भाष्यद्वयसंवलितानि) ३१–७६

प्रथमः परिभाषाखण्डः ३३; प्रतिज्ञा ३३; यजुश्छन्दोनामानि ३३; यजुश्छन्दसामक्षरसंख्या ३४; अक्षरगणनापरिभाषा ३५; ऋक्छन्दःपरिभाषा ३९; संख्यानिर्देशपरिभाषा ४१; अनादेशपरिभाषा ४२।

द्वितीयश्छन्दोलक्षणनिरूपणखण्डः ४२; गायत्र्यधिकारः ४२; उष्णिगधिकारः ४५; अनुष्टुबधिकारः ४८; बृहत्यधिकारः ५०; पङ्क्त्यधिकारः ५४; त्रिष्टुबधिकारः ५७; जगत्यधिकारः ६२।

तृतीयः प्रकीर्णखण्डः ६५; छन्दोदैवताधिकारः ६५; देवताधारेण छन्दस आर्षपरिज्ञापनाधिकारः ६८; यज्ञमुखेन ऋषिदैवतच्छन्दोविज्ञापनाधिकारः ६९; मन्त्रर्षिदेवतोपपरीक्षाधिकारः ७२; छन्दःपुरुषन्यासाधिकारः ७३।

परिशिष्टभागः ७७–८४

कात्यायनोक्तच्छन्दसां विवरणम् ७९; माध्यन्दिनीयछन्दसामुदाहरणसूची ८३।

मङ्गलम्

१

गणपतिमीशं करुणावरुणालयमन्तरायपूगहरम्
श्रीश्यामं भगवन्तं भवभयखेदच्छिदं वन्दे

२

यस्माच्चातुर्वर्ण्यं चत्वारश्चाश्रमास्त्रयो लोकाः
सिद्धयन्ति यज्ञपुंस्वाः कालत्रितयं नमोऽस्तु वेदाय

३

भगवत्प्रसादपादान् गोपालचन्द्रमिश्रार्यचरणांश्च
श्रुतिसायुज्यमवाप्तान् सततं वन्देऽस्मदीयगुरुवर्यान्

४

शास्त्रोक्तवादान् प्रतिपद्य तेषां
समन्वयायैष कृतः प्रयत्नः
असाधु यत्, तत्र स नः प्रमादो
यत् साधु, सर्वः स गुरुप्रसादः

५

भूमौ स्खलितपादानां भूमिरेवावलम्बनम्
श्रुते जातापराधानां त्वमेव शरणं श्रुते !

—लेखकस्य

श्रीः

वैदिकच्छन्दःपर्यालोचनम्

गणपतिमीशं करुणावरुणालयमन्तरायपूगहरम् ।
श्रीश्यामं भगवन्तं भवभयखेदच्छिदं वन्दे ॥

छन्दस्तत्त्वं नाम वैदिकदर्शनस्यात्मभूतं वेदपुरुषस्य च गतिकारकं पादाङ्गम् । छन्दोरूपं मानदण्डं परिगृह्य वैदिकदर्शनस्य परिधिर्विधातुं शक्यते, नान्यथा । छन्दस्तत्त्वमपरिज्ञाय वैदिकसाहित्यस्य दर्शनस्य वा याथातथ्येन परिज्ञानमसम्भवमेव । तदेतदृचाभ्युक्तम्—

कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रतिवाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कःस्वित् ॥

इति ।[1] सर्वाणि मूलच्छन्दांस्यपि अपौरुषेयवाण्या एव समुपदिष्टानि सदैकतानि यथा[2]—

अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता सं बभूव ।
अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत् ॥
विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः ।
विश्वान् देवाञ्जगत्या विवेश तेन चाकल्पत ऋषयो मनुष्याः ॥

छन्दस्तत्त्वस्य यथार्थज्ञानेनामृतत्वाधिगमोऽपि तत्रैवोक्तः[3]—

यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत ।
यद् वा जगज्जगत्याहितं पदं य इत्तद् विदुस्ते अमृतत्वमानशुः ॥

इति । सृष्टियज्ञस्याप्यनुष्ठापनं छन्दसां सहयोगेनैव भवितुमर्हतीति वाजसनेयके श्रूयते ।[4] सेयं छन्दसां निरूपणपरम्परा वेदमारभ्येदङ्कालं यावदविच्छिन्ना दृश्यते । तत्रापि मूलं तु वैदिकच्छन्दांस्येव । तेषामेव लौकिकं स्वरूपं शास्त्रान्तरेषु समवलोक्यते । यथा पिङ्गलाचार्येण

१. ऋ. १०।११४।९ २. ऋ. १०।१३०।४-५
३. ऋ. १।१६४।२३ ४. सहच्छन्दस आवृतः (मा. सं. ३४।४९)

'चतुष्पादृतुभिः'[1] इत्येवं लक्षिता वैदिकी गायत्री लोके 'तनुमध्या' प्रथिता[2], वैदिकी चोष्णिक् 'चतुष्पादृषिभिः' इत्थं समाख्याता[3] लौकिकी कुमारललिता सञ्जाता[4]। वैदिकच्छन्दसां स्वरूपपर्यालोचने प्रथमतश्छन्दश्शब्देन व्युत्पन्निलभ्योऽर्थो निरूप्यते।

छन्दश्शब्दार्थः

छन्दःस्वरूपपरिशीलने पूर्वकालादेव सिद्धान्तद्वयं प्रचलतीति ज्ञायते। तद्द्वयं तु नैरुक्तसिद्धान्तः वैयाकरणसिद्धान्तश्चेति। उभयत्रापि प्रकृति-वैशिष्ट्यमेव विचारवैभिन्ये मूलम्। छाद्यते छन्द्यन्ते वा अनेनेति छन्द इति नैरुक्ताः। चन्द्यतेऽनेनेति तु वैयाकरणाः। नैरुक्तानां छन्दःशब्दव्युत्पत्तिर्वेद-शब्दराशिमपौरुषेयमभिलक्ष्य प्रवृत्ता। वैयाकरणानां तु प्रायः लौकिकशब्द-सङ्घाताधारेण छन्दोव्याकृतिः। तत्र 'चदि आह्लादे दीप्तौ च' इति भ्वादिपरस्मैपदी सेट् धातुः। तस्य च इदित्वात् 'इदितो नुम् धातोः'[5] इति नुमि, चन्द इत्यस्मात् चन्दनम्, चन्द्यते अनेनेति वा इति विग्रहे 'चन्देरादेश्च छः' इत्युणादिसूत्रेण[6] असुनि प्रत्यये कृते आदिवर्णचकारस्य छकारे च कृते छन्दश्शब्दो निष्पाद्यते। चन्दनं छन्दः, चन्द्यते अनेन इति वा छन्दः। शब्दोऽयं सान्तो नपुंसकः।

वैयाकरणसिद्धान्तमूरीकृत्य मेदिन्यमरादिकोषकृतोऽपि पद्यच्छन्दसोः पर्यायत्वमूचुः। 'छन्दःपद्येऽभिलाषे च'[7] इत्यमरोक्तेश्छन्दःशब्दोऽनुष्टु-बादिपद्यार्थकः। 'छन्दः पद्ये च वेदे च स्वैराचाराभिलाषयोः' इति मेदिनी-कोशे पद्यार्थकश्छन्दश्शब्दो वेदवाचकोऽपि क्वचिद् वर्तते। वेदस्तु 'मन्त्र-ब्राह्मणयोर्वेदनामधेयम्' इति कात्यायनोक्तात् प्रतिज्ञापरिशिष्टसूत्रादन्यैश्च बहुभिः प्रमाणैर्निर्णीतत्वात् परम्पराप्रसिद्धिवशाच्च मन्त्रब्राह्मणोभयात्मकः। परं पद्यच्छन्दसोः पर्यायत्वोक्तेस्तु आपातसाधुत्वमेव, न त्वैकान्ततः। अपौरुषे-यगद्येष्वपि छन्दोविधानात्, लौकिकदुर्गासप्तशत्यादिमन्त्रेषु च लौकिक-लक्षणातिरिक्तगायत्र्यादिछन्दोनिर्देशात्। परमार्थतस्तु गद्यपद्यात्मकोभयविध-वैदिकलौकिकशब्दराशिमभिव्याप्य संस्थितत्वाच्छन्दसां छन्दस्त्वम्।

१. पि. छ. सू. ३।८
२. तनुमध्या त्यौ (पि. छ. सू. ६।७)
३. पि छ. सू. ३।२२
४. कुमारललिता ज्सौग् (पि. छ. सू.६।८)
५. पा. ७।१।५८
६. ४।२१९ उ०
७. अ. को. ३।३।२३२

साहित्यदर्पणकृद्विश्वनाथाचार्यस्तु, छन्दोबद्धमिदं पद्यमिति लक्षि-तत्वात् पद्यच्छन्दसोर्भेदमभिप्रैतीत्यस्मदभिमतम्। अत्र लक्षणे पद्यकाव्ये छन्दस अनिवार्यत्वमुक्तम्, न तु पद्यच्छन्दसोरभेद उपदिष्टः। तथा चानेन लक्षणेन छन्दसो व्यापकत्वं, पद्यस्य तदेकदेशवर्तित्वं, सर्वत्र गद्ये छन्दसो-ऽभावराहित्यमपि ध्वन्यते।

श्रीमद्राजशेखरवर्योऽप्यालङ्कारिकः 'सारस्वतेयः काव्यपुरुषः' इति प्रकृत्य तस्य 'रोमाणि च्छन्दांसि' इत्येवं वदन् सर्वत्र काव्यशरीरे रोमवच्छन्द-सामपरिहार्यत्वं मन्यते। अथ च काव्यमीमांसकः—त्वत्तः पूर्वे हि विद्वांसो गद्यं ददृशुर्न पद्यम्, इत्येवं छन्दसां गद्यपद्योभयाच्छादकत्वप्रतिपादकं नैरुक्त-समयमेव परिपुष्णाति।[1]

अलङ्कारशास्त्रस्य प्राचीनं छन्दोविचित्यभिधानमपि दृश्यश्रव्योभय-विधकाव्ये छन्दोवैशिष्ट्येनैव समन्वेति। परवर्त्तिनः आलङ्कारिकास्तु छन्दस आह्लादनात्मकं दीप्त्यात्मकं च चमत्कारप्रधानं लौकिकं स्वरूपम-वधार्य लोकधिया पद्येष्वेव नियतोपस्थितिकमेतदुपदिदिशुरित्यास्माकीना धारणा।

वस्तुतस्तु लौकिकसाहित्ये वृत्तगन्धिगद्यभेदो गद्येऽपि वृत्तयुक्तत्वं निर्दिशति। दण्डाख्यं पूर्णतया वर्णच्छन्द उच्चारणे याजुषपाठवत् सांहि-तिकं मनोहारि विशिष्टञ्च मन्यते आलङ्कारिकैः। एवं हि यजुषां छन्दःप्रक्रियाद्यत्वेऽपि प्रचलतीति सुवचम्।

वैदिकदृशा छन्दःस्वरूपम्

स्थूलतया 'यदक्षरपरिमाणं तच्छन्दः' इत्येतल्लक्षणमृग्भागे यजुर्भागे चोभयत्र सङ्गच्छते। परमेतदपर्याप्तं भवति। लक्षणमिदं वाचि-कछन्दःस्वेव। श्रुतिषु तु लोकाश्छन्दांसि देवताश्छन्दांसीत्येवमुक्तम्। 'तेजो वै ब्रह्मवर्चसं गायत्रम्, ओजो वा इन्द्रियंवीर्यं त्रिष्टुप्, पशवो जागताः' इत्यादिश्रुतिषु वर्णच्छन्दः, अपरवाक्छन्दः इत्येवं विभिन्नतत्त्वानां छन्द-स्त्वमुच्यते। अतश्छन्दोलक्षणमपि मीमांसकरीत्या मन्त्रलक्षणवदूरूढमेव[2]।

१. द्र० का० मी० अ० ३
२. अहेर्बुध्निय मन्त्रं म इति मन्त्रस्य लक्षणम्।
नास्त्यस्ति वास्य नास्त्येतदव्याप्त्यादेरवारणात्॥
याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितम्।
तेऽनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जते॥ (जै. न्या. मा. २।१।७)

यथा—मननहेतुर्मन्त्र इति मन्त्रस्वरूपं ब्राह्मणादावतिव्याप्तमतो मीमांसकैर्याज्ञिकानां समाख्यानं मन्त्र इत्येवं मन्त्रा लक्षिताः। छन्दसां स्वरूपमपि 'गायन्तं त्रायते, चतुर्थेन पादेनानुष्टोभति' इत्यादिब्राह्मणग्रन्थोक्तमर्थवादगर्भितमेव न स्फुटं लक्षयति।[1] यत्र कुत्र चित्, छन्दोब्राह्मणानि च तद्विषयाणीत्यादौ मन्त्रभागस्यापि छन्दःशब्देनाभिधानं दृश्यते, तत्त्वेकदेशीयमेव।

ब्राह्मणे 'प्राणमात्राच्छन्दः' इति छन्दःस्वरूपं श्रूयते। सर्वं हि स्थावरजङ्गमं सप्राणम्, 'प्राणे हीमानि भूतानि सम्यञ्चि' इति शतपथश्रुतेः। प्राणः सर्वत्र व्यक्तिभेदभिन्नया कयाचिन्नियतयैव मात्रयावस्थाय स्वप्रणीतं स्वायत्तं शरीरमधितिष्ठति। तत्रापि वाचिकभौतिकभेदेन प्राणस्य द्विविधत्वम्। स्वयं राजन्त इति स्वराणां वाचिकप्राणत्वम्। भौतिकप्राणत्वं तु वैश्वानरस्य। मात्रा च वस्तुमर्यादाबन्धः अवच्छेदात्मकः। सर्वस्यापि प्राणरूपत्वादवच्छेदश्छन्दःपदार्थः।

अथ कीदृशोऽयमवच्छेद इति विचार्यते। ब्राह्मणग्रन्थे श्रूयते—ते छन्दोभिरात्मानमाच्छादयन्. यदेभिरच्छादयन्, तच्छन्दसां छन्दस्त्वम् छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणः' इति[2]। अत्र छादनात् छन्दांसि निर्दिष्टानि। परमत्र छादनं न पूर्णतया पिधानमपितु संवरणरूपम्। तथा चोक्तम्—'छादनाच्छन्द उद्दिष्टं वाससी इव चाकृतेः' इति। छाद्यते छन्द्यते वा अनेनेति छन्दः, इत्येवं व्युत्पत्तौ आच्छादने संवरणमभिप्रेतम्। संवरणार्थे आच्छादनप्रयोगः 'आच्छाद्य चार्चयित्वा च' इतिमन्वादिस्मृतिषु दृष्टचरः। न तु—मेघच्छन्नेऽह्नि दुर्दिनमितिवदत्रावरणात्मकमाच्छादनम्। आवरणरूपमाच्छादनं तु 'घनच्छन्नदृष्टिर्घनच्छन्नमर्कम्'

१. द्र० गायतो मुखादुदपतत्, गायन्तं त्रायते,
गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभति,
अथ यदन्यानि छन्दांसि वर्षीयांसि भूयोऽक्षराणि अथ कस्मादेतां बृहतीत्याचक्षते,
एतया हि देवा इमांल्लोकानाप्नुवत, ते वै दशभिरक्षरैरिमं लोकमाप्नुवत,
दशभिरन्तरिक्षम्, दशभिर्दिनम्, चतुर्भिश्चतस्रो दिशः द्वाभ्यामेवास्मिँल्लोके
प्रत्यतिष्ठन् तस्मादेनां बृहतीत्याचक्षते।

२ तु० प्रजापतिरग्निमचिनुत, स क्षुरपविर्भूत्वातिष्ठत्, तं देवा बिभ्यतो नोपायन्,
ते छन्दोभिरात्मानं छादयित्वोपायन्, तच्छन्दसां छन्दस्त्वम्, ब्रह्म वै छन्दांसि
(तै० सं० ५।६।६।१)

इत्यादौ दृष्टिसम्बन्धप्रतिबन्धकार्थम्। परन्तु न तथा सर्वत्र युज्यते। आच्छाद्यते त्वद्यशसा समस्तम्, छत्रच्छन्नः, काचेनाच्छादिते दीपे न लब्धावसरोऽनिलः, इत्यादौ छदेः प्रयोगो न दृष्टिसम्बन्धप्रतिबन्धकतया वर्तते। अतः अनपेक्षितेतरसम्बन्धापवारकत्वमेवाच्छादकत्वम्। एवञ्च अवच्छेदः आच्छादनमित्यर्थतः सममेवोभयम्।

सोऽयमवच्छेदस्त्रिधा भवतीति याज्ञिकपीयूषपादा अभिप्रयन्ति, उदाहरन्ति च वाजसनेयश्रुतिम्—माच्छन्दः प्रमाच्छन्दः प्रतिमाच्छन्दः, इति। तथा चायं भावः—छन्दोवैशिष्ट्यमभिदधाना वैदिका माप्रमाप्रतिमाशब्दा लौकिकभाषायां मान-प्रतिष्ठा-तुलितकार्थाः। त्रयोऽप्येते पदार्थगतांशत्रयबोधनार्थं प्रवृत्ताः। तथा च दार्शनिका भणन्ति, व्यक्त्याकृतिजातयस्तु पदार्थः इति। तत्र गुणविशेषाश्रयमूर्त्तिर्व्यक्तिः। आकृतिर्जातिर्लिङ्गाख्या। समानप्रसवात्मिका च जातिः। तथा च श्रुत्यनुशीलने—व्यक्तिभावप्रधानो दिग्देशकालसंवित्संख्यारूपोऽवच्छेदः मानम्। मापदेन परिच्छेद-सीमा-मर्यादा-भिविधि-नियति-नीति-रीति-व्यवस्थाद्यर्थानां सङ्ग्रहः। आकृतिभावप्रधानः अणुत्वमहत्वह्रस्वत्वदीर्घत्वनियामकसन्निवेशरूपोऽवच्छेदः प्रतिष्ठा। सैवात्र प्रमा, न तु यथार्थानुभवरूपा। प्रमापदेन आयतनाशयपरिमाणप्रमाणादेः सङ्ग्रहः। जातिभावप्रधानः समानद्रव्यगुणकर्मरूपोऽवच्छेदः प्रतिमा, तुलितकमिति साधर्म्य-सामान्य-सादृश्य-सारूप्य-प्रतिमिति-प्रतिमानाद्यर्थकम्।

ततश्च मा-प्रमा-प्रतिमात्मकभेदत्रयभिन्नः प्राणावच्छेद एव छन्दःपदार्थ इति प्राणमात्राच्छन्दःश्रुत्यभिप्रायः। शाब्दिकच्छन्दःस्वस्याः श्रुतेरर्थसङ्गतिरेवं भवति—अस्य प्राणस्यायमवच्छेदो यैरवयवभूतैरन्यान्यैः प्राणैः प्रसाध्यते ते प्राणाश्छन्दःशास्त्रपरिभाषायामक्षरशब्दवाच्याः। तेषां चाक्षरप्राणानां प्रातिस्विकोऽवच्छेदो मात्राशब्देन। तदवच्छेदकाक्षरसंख्याभेदाच्छन्दांसि भिद्यन्ते, अष्टाक्षरा गायत्रीत्यादिरूपेण।

छन्दसामाच्छादकत्वम्

यो हि पदार्थः कञ्चिदंशं भूभागं वा आच्छादयति तदर्थेऽपि विशेष्यरूपेण छन्दःशब्दप्रयोगो वेदेषु श्रूयते। यथा अग्निचयने द्वादश इष्टकाः सुपर्णस्य पक्षपुच्छात्मनां सन्धौ परस्परं योजनाय स्थाप्यन्ते। ता इष्टकाः

छन्दस्या उच्यन्ते। छन्दस्येष्टकोपधानमन्त्रेषु पृथिव्यन्तरिक्षद्युलोकादि-पदार्थाः विभिन्नतत्त्वानि चाच्छादनधर्मसत्त्वात् छन्दःसंज्ञयाभिधीयन्ते[1]।

निरुक्तकृद्यास्कदिशा नानार्थेषु प्रयुज्यमानश्छन्दःशब्द आवरणार्थ-काच्छदिर्धातोर्निष्पाद्यते।[2] गायत्र्याद्यक्षरसंख्याविशेषात्मका मन्त्रा अपि स्वनियतसंख्याक्षरैरावृताः सन्तो मन्त्रपदगतार्थविशेषगर्भा अर्थप्रच्छादका भवन्तीति ते छन्दःपदाभिधेयाः।

ब्राह्मणग्रन्थे[3] छन्दःशब्दनिर्वचनप्रसङ्गे आख्यायिकेयमुपदिष्टा यत्कस्मिँश्चित् काले देवाः मृत्योर्बिभ्यमानाः भयनिवृत्त्यर्थं स्वरक्षणार्थञ्चा-त्मानं छन्दोभिराच्छादयामासुः। एवं ते मृत्युभयाद् विमुक्ताः। अनया-ख्यायिकया आङ्पूर्वे छद्धात्वर्थे छन्दश्शब्दप्रयोग उच्यते। ततश्चेदं फलति यत् कृत्नेऽपि वेदशब्दराशौ मन्त्रादिरूपे ऋग्यजुस्सामात्मके सर्वत्रैव च्छन्दो मन्तव्यम्। यतो हि सर्वोऽप्यपौरुषेयो वाक्यसमूहः पापतापादध्येतारमाच्छाद्य संरक्षयति। अत एव निरुक्ते मन्त्रशब्दनिर्वचने तेषां मननात् त्राणकरत्वं स्पष्टमुक्तम्।

ब्राह्मणोक्ताख्यायिकया इदमपि स्फुटीभवति यद्देवाः अमरत्वरक्षण-लोलुपाः विभिन्नमन्त्राक्षरेष्वेवालौकिकेषु स्वां स्वां देवत्वशक्तिमलौकिकीं न्यदधुः। मन्त्रविग्रहेणाधुनापि देवाः प्रत्यक्षा एव। अयमेवाभिप्रायो मीमां-सकानां मन्त्रात्मकरूपस्वीकारे देवतायाः। ते तु न पृथक्शरीरं देवताया मन्यन्ते। मन्त्राक्षरेषु देवतत्त्वाच्छादनं छन्दोभिरेव भवतीतिच्छन्दसां वैदिकानां महिमातिशयः। फलतश्चैकादिचतुःशताक्षरप्रभृतिमन्त्रेषु च्छन्दो-विधाने नास्ति विप्रतिपत्तिः। अत एव प्राणायामविनियोगे सप्तव्याहृतीनां गायत्र्युष्णिगादिच्छन्दांसि सप्त निर्दिश्यन्ते।

ब्राह्मणाख्यायिकायां देवपदेन अकारादिवर्णानामपि वर्तते उपदेशः। देवाः दीपनादिति निरुक्तोक्तिः। अर्थस्य दीपयितारः अकारादयो वर्णाः उच्चारणप्रयत्नादिशैथिल्येन स्वस्वरूपनाशलक्षणान्मृत्योर्बिभ्यमानाः छन्दो-भिरात्मानमाच्छादितवन्तः। अतः सावित्र्यादिमन्त्राणां प्रतिवर्णं

१. छादनाच्छन्दः (मा० सं० १४।१८ उवटमहीधरभाष्ययोः)
२. छन्दांसि छादनात् (नि० ७। १२)
३. देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशँस्ते छन्दोभिरच्छादयन्, यदेभिरच्छादयँ-स्तच्छन्दसां छन्दस्त्वम् (छा० उ० १।४।२)

छन्दःकल्पनापि सञ्जच्छते, प्रत्येकं वर्णस्योच्चारणप्रयत्नादिद्वारा सुदृढं समाच्छादितत्वात्। मन्त्रेषु सदुच्चारणादिनियमो विशिष्टः, तद्विरहेण शैथि-ल्येन वा फलविरहाद् वैपरीत्याच्च। तथा चोपदिष्टमेव—

मन्त्रो हीनः स्वरतो वर्णतो वा,
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ इति।

अतएव प्रतिवर्णं छन्दोविधानज्ञानस्य सदुच्चारणायानिवार्यत्वम्, फलसाधकत्वञ्च। तथा चोक्तं सर्वानुक्रमण्याम्—

"सर्वमेतच्छन्दोदैवतमार्षं च विज्ञाय यत् किञ्चित् जपहोमादि करोति तस्य फलमश्नुते" (३१९) इति। आर्षेयब्राह्मणेऽपि—

'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्या-पयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान् भवति, इति।[1]

छन्दोज्ञानं खलु न सन्ध्यावन्दनादिवदकरणे प्रत्यवायजनकमे-वापितु फलाधायकमपि भवति। यथोक्तमुवटार्येण[2]—

स्वर्ग्यं यशस्यमायुष्यं पुण्यं वृद्धिकरं शुभम्।
कीर्तिमृग्यं यशस्यञ्च छन्दसां ज्ञानमुच्यते॥ इति।

अर्थाच्छादनेन छन्दस्त्वम्

अर्थस्य च्छादनाच्छन्द इत्येवं निरुक्त्या कृत्स्नापि वाक् छन्दःपदा-भिधेया। सा च वाग् वेदरूपैवापौरुषेया, नित्या, आद्या, अनन्ता चेति सैव वेदवाणी छन्दःपदाभिधेया भवति, अन्यवाचां विनश्वरत्वात्। भावानामा-च्छादकत्वेनैव भवति वाचामुत्पत्तिः। अत एव निरुक्ते समुक्तम्-'अणीय-स्त्वाच्च (भावानां) शब्देन संज्ञाकरणं व्यवहारार्थं लोके' इति[3]। अत एव भाषाशास्त्रविदोऽपि एकाक्षरलिपिं प्राचीनां व्यवस्थापयन्ति, यथाद्यत्वे चीनदेशीया लिपिः।

१. आर्षेयब्राह्मणम् १।१।६
२. ऋक्प्रातिशाख्यभाष्ये (पृ० ५०३)
३. नि. १।२

अस्माकं परम्परायामपि सर्वतः प्रथममेकाक्षरस्य शब्दस्यैवोपदेशः 'ॐ इत्येकाक्षरं ब्रह्म' इत्यादिना। तथैव बीजमन्त्राः, यथा मायाबीजम्, वाग्बीजम्, कामबीजम्, इत्यादयः। नैते मन्त्राः, अपितु बीजमन्त्रा एव। एकाक्षरबीजानामेव धर्मरूपत्वम्। तदिदं बीजं धर्मरूपमाराध्य आत्मसात्कृत्वा ऋषयः संबभूवुः। तथा चोक्तं निरुक्ते 'साक्षात्कृतधर्माण ऋषयो बभूवुः' इति। ते च साक्षात्कृतधर्माणोऽनेकाक्षरमन्त्राणामुपदेशमकुर्वन्नित्यपि तस्मादेव ज्ञायते 'तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः' इतिना। सर्वे वेदा यत्पदमामनन्ति विशन्ति, इत्यत्रापि बीजाक्षराणामेव निर्देशः।

बीजमन्त्रेषु त्वध्याहार-विवेका-भ्यास-साधनादीनां वैशिष्ट्यादुष्करत्वमवराणाम्। मन्त्रजपेऽपि निद्रात्यागैकाग्र्यमेधादिविशेषाणामपेक्षितत्वादवराणां कृते मालामन्त्राः, शताक्षरमालामन्त्राः[1] इत्यादयः सुकराः। ततश्च 'उपदेशाय ग्लायन्तोऽवरे बिलमग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च' इत्येवं यास्काचार्याः स्थूलधियां कृते स्तोत्रमन्त्राणां प्रकाशं निर्दिशन्ति। अत्र ग्रन्थपदं ग्रथनात्मिकां मालामुपलक्षयति। मालामन्त्रेषु चरित्रादेः सङ्केतः स्मर्यते। स्तोत्रमन्त्रेषु तु विवरणमधिकं भवति। अत एव वेदं (ज्ञानं) वेदाङ्गानि (विवरणानि) च द्वयमपि समुपदिदिशुः स्तोत्ररूपेणाचार्याः।[2] स्तोत्राणामपि मन्त्रत्वमव्याहतमेव, तदभावे कर्मसम्पत्तिविरहात्। यथोक्तं तत्रैव 'तेषां (शब्दानां) मनुष्यवद्देवताभिधानम्, पुरुषविद्यानित्यत्वात्कर्मसम्पत्तिर्मन्त्रो वेदे' इति।[3] एवं हि निरुक्तदिशा बीजाक्षरमारभ्य ग्रन्थपर्यन्तं सर्वत्रार्थस्य छादनाच्छन्द इति सुवचम्।

छन्दोभ्यः सृष्टिः

शुक्लयजुर्वेदीयायां माध्यन्दिनसंहितायां चतुस्त्रिंशाध्यायस्यैकोनपञ्चाशत्तमे मन्त्रे ऋषिभिः सम्पादितायाः सृष्टेर्वर्णनमुपदिष्टम्[4]। मन्त्रेऽत्र सृष्टिविस्तारे ऋषिभिश्छन्दसां सहयोगोऽपि निरूपितः। ब्राह्मणग्रन्थेषु च चतुर्णां वर्णानामुत्पत्तौ विविधच्छन्दसां निर्देशो दृश्यते। तदनुसारेण गायत्रीच्छन्दसो ब्राह्मणवर्णस्य, त्रिष्टुप्छन्दसः क्षत्रियवर्णस्य, जगतीच्छन्दसश्च वैश्यवर्णस्य रचना मन्यते। तुरीयवर्णरचनायां न कस्यापि च्छन्दसः सम्बन्धः। अत एव छन्दोहीनत्वात् तस्य उपनयनवेदाध्ययनयज्ञकर्मभ्यो मुक्तिरवधार्यते।

१. द्र. शताक्षरा गायत्री आश्वलायनश्रौतसूत्रे (३।१४।१०।१५४)
२. द्र. साक्षात्कृतधर्माण ऋषय।.....समाम्नासिषुर्वेदं च वेदाङ्गानि च (नि.१।२०)
३. नि. १।२ ४. द्र. सहच्छन्दसः (मा. सं ३४।४९)

वर्णोत्पत्तिसम्बद्धानां छन्दसां पादाक्षरसंख्यामनुसृत्यैव उपनयनकालस्तत्तद्वर्णार्थं प्रारब्धः सन् संख्याद्विगुणत्वे समाप्तिमुपैति। अत एव ब्राह्मणवर्णार्थमुपनयनकालोऽष्टवर्षात्मकं वय आरभ्य षोडशवर्षपर्यन्तं भवति। क्षत्रियवर्णस्योपनयनकाल एकादशवर्षप्रभृति द्वाविंशतिवर्षान्तः, वैश्यवर्णस्य च द्वादशं वर्षं प्रकृत्य चतुर्विंशतितमं वर्षं यावद् वास्तविकः प्रायश्चित्तरहितश्चोक्तः। उपनयनद्वारा त्रैवर्णिकस्य द्वितीयं जन्मावधार्यं तस्य द्विजसंज्ञा प्रवर्तते। अस्मिन्नुपनयनात्मके द्वितीये जन्मनि आचार्यः (गायत्रीमन्त्रोपदेशको गुरुः) एव पिता, सावित्री च मन्त्राधिष्ठात्री शक्तिर्माता भवति।

अत्रापीदमवधेयं यत् सामान्यतया गायत्रीछन्दस्का सवितृदैवत्या 'तत्सवितुः' इत्येषा या ऋक् तां त्रैवर्णिकेभ्यः सर्वेभ्य एव गुरुरुपदेष्टुं प्रभवति। तथापि वर्णवैशिष्ट्येन विभिन्नच्छन्दस्कानां सावित्रीणामृचां तत्तद्वर्णोत्पत्तिसम्बद्धच्छन्दोऽनुरोधेनोपदेशे विधानविशेषः। यज्ञप्रयोगेष्वपि वर्णानुसारेण तत्तच्छन्दसां यथावसरं सभाजनं फलश्रुतिपुरस्सरमुपदिष्टं शास्त्रेषु। अनेनेदं फलति यद् वर्णेषु ब्राह्मक्षात्रविड्बलानामभिवर्द्धनाय संरक्षणार्थञ्च छन्दसां सविशेषं माहात्म्यं वरीवर्त्ति।

सृष्टिक्रमे छन्दांसि प्रजापतिं सम्प्राप्तानि इति शतपथश्रुत्यावगम्यते[1]। तथा हि 'तान्यस्मै (प्रजापतये) अच्छदयंस्तानि यदस्मा अच्छदयँस्तस्माच्छन्दांसि' इति। देवानां स्वर्गप्रापकाण्यपि छन्दांस्येवेति तत्रोक्तम्–'यातयामानि वै देवैश्छन्दांसि, छन्दोभिर्हि देवाः स्वर्गं लोकं समाश्नुवत' इति।[2] किं बहुना यज्ञवाहकत्वेन पशुत्वमपि छन्दसामेवेत्युपकारपरम्परा श्रूयते शतपथ एव 'पशवो वै देवानां छन्दांसि, तद्यथेदं पशवो युक्ता मनुष्येभ्यो वहन्त्येवं छन्दांसि युक्तानि देवेभ्यो यज्ञं वहन्ति' इति।[3]

यजुर्भागस्य छान्दसत्वम्

सामान्यतया छन्दःशब्दो हि उच्चारितस्य शब्दराशे रचनाया वा वर्गीकृतसमूहाक्षरगणनायां प्रयुज्यते। अक्षरगणनाप्रकारस्तु द्विविधः, स च वैदिकपरिभाषानुसारमृङ्मन्त्रेषु यजुर्मन्त्रेषु चोपलभ्यते। यजुरितिसंज्ञया

१. श. ब्रा. ८।५।२।१
२. श. ब्रा. ३।९।३।१०
३. श. ब्रा. १।८।२।८

तेषां मन्त्राणां ग्रहणं भवति येषु च्छन्दसोऽवान्तरांशस्य पादाख्यस्य संख्यायाः, पादगताक्षरसंख्यायाश्च नास्ति नियतप्रतिबन्धः। अत एवोक्तमाचार्यैः 'अनियताक्षरपादावसानं यजुः' इति।

ऋगितिसमाख्यया तेषां मन्त्राणामवबोधनं, येषु एकस्य च्छन्दसोऽन्तर्भुक्ताः पादाख्यावान्तरभागाः पादान्तर्गताक्षरसंख्याश्च निश्चिता भवन्ति[1]। अत एव यजुर्मन्त्रेषु नियतपादव्यवस्थाया नैरपेक्ष्यादेकस्मिन् मन्त्रे एकमवसानं बहूनि वावसानानि भवितुमर्हन्ति। सा चेयमवसानकल्पना कल्पाद्युक्तविनियोगमाश्रयति। वैदिकपुस्तकेषु मन्त्रसङ्ख्यायाः परिज्ञापनमङ्कनिर्देशद्वारा भवति। परं तत्र, विशेषतो यजुर्वेदे कल्पशास्त्रानुसारं ब्राह्मणग्रन्थोक्तो वा एक एव मन्त्रः, इत्येवं तत्सङ्ख्यामूलेन नावश्यतया निर्द्धारणीयम्। अर्थात् स्थूलदृष्टया संख्यया सङ्केतिते परिगणिते वा मन्त्रे बहवोऽपि मन्त्रा भवितुमर्हन्ति।

अथ च यत्र कुत्र चिद् यजुर्वेदे स्थूलदृष्टया पुस्तकेषु संख्याद्वयेन बोधितः शब्दराशिः ब्राह्मणकल्पादिग्रन्थेषु एको मन्त्र उक्तः। एवं हि पुस्तकसङ्केतितं मन्त्रद्वयमेको मन्त्रो विनियोगदृशा भवति। परन्तु एतादृशोदाहरणानि अल्पीयांस्येव। स्थूलदृष्ट्या संख्यया सङ्केतिता मन्त्रा माध्यन्दिनीयकाण्वादिशाखासु क्वचित् कण्डिकापदेन, क्वचित् खण्डिकापदेन, क्वचिन्मन्त्रपदेन, क्वचिच्च खण्डपदेनाभिधीयन्ते। एकस्यां कण्डिकायामनेकमन्त्राः 'इषे त्वोर्ज्जे त्वा' इत्यत्र[2] द्रष्टव्याः। एवमन्यान्यप्युदाहरणानि दृश्यन्ते।

उपर्युक्तपरिशीलनेन स्फुटं भवति यद् यजुर्मन्त्रेषु (गद्ये) वेदे नियताक्षराणां पादानामसत्त्वेऽप्यक्षरगणनया छन्दोनिर्देशः। गद्यात्मकयजुर्भागे छन्दोविधानं वेद एव विशिष्यते, न तु सामान्यतया लोके। ततश्च यजुर्भागस्यापि छन्दःसंज्ञापनमव्याहतम्।

यत्तु के चन 'यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते' इति कात्यायनोक्त्या यजुर्भागे छन्दस्त्वं नाभिप्रयन्ति, तदेकदेशीयमेव। कात्यायनेनाप्येकेषामिति सङ्केतितत्वात्। एवमेव सायणार्यः कृष्णयजुर्भाष्ये प्रतिपादयति ऋचां छन्द उक्त्वा 'नन्वितरेषामपि मन्त्राणामनेन

१ नियताक्षरपादावसाना ऋक् (द्र० माध्यन्दिनीयसंहिताभाष्यारम्भे महीधरः)
२. मा० सं० १।१

न्यायेनाक्षरमात्रासंख्याविशेषमुपजीव्य यत्किञ्चिच्छन्दः कल्प्यतामिति चेन्न। यजुषां छन्दःकल्पने श्रुतिविरोधप्रसङ्गात्। तथा च ब्राह्मणं पूर्वमेवोदाहृतम्—"तत्रोभयोर्मीमांसा, जामि स्यात्, यद्यजुषाज्यं यजुषाप उत्पुनीयात्, छन्दसाप उत्पुनात्यजामित्वाय" इति। तत्र यजुर्निषिध्य छन्दोऽभिधीयते। ततो यजुषां छन्दो न श्रुतेरभिमतम्। तथा सति स्वशक्त्या किञ्चिन्नूतनं छन्दः कल्पयितुं न शक्यते। किन्तु पूर्वसिद्धसम्प्रदायागतं छन्दोलक्षणं यत्र यत्रास्ति तस्यां तस्यामृचि छन्दो जानीयात्, ऋचामेव छन्दोविधानात्' इति।[1] अत्र भावोपसङ्ग्रहे भ्रान्ताः के चन यजुषि छन्दोविरहमवगच्छन्ति।

परमत्रायमाशयः सायणार्यस्य यद् यजुर्भागे न किञ्चन नूतनं छन्दः कल्पनीयम् 'किन्तु पूर्वसिद्धसम्प्रदायागतं छन्दोलक्षणं यत्र यत्रास्ति' इत्येवं स्फुटमुक्तेः। पूर्वसिद्धसम्प्रदायागतत्वं तु यजुश्छन्दसामप्यव्याहतम्। वस्तुतस्तु सायणार्यो नूतनानामनार्षेयाणां पौरुषेयाणां शब्दमात्रसङ्घटनात्मकानां मन्त्राभासानां लौकिकानामितरेषामनेन न्यायेनाक्षरमात्रासंख्याविशेषमुपजीव्य वैदिकं यत्किञ्चिच्छन्दःकल्पनं दूषयति, यथाद्यत्वे गुरुवेदराष्ट्रवेदादिवेदब्रुवाणाम्। तथैव च ब्राह्मणवाक्यमप्युदाहरति, यत्ते लौकिका मन्त्राभासा यजुर्मात्रस्वरूपा गद्यात्मकाः, न तु छन्दोरूपाः। अत एव मन्त्राभासैस्तैः सम्पादितं कर्म जामि व्यर्थं स्यादिति श्रुत्याशयः।

वस्तुतस्तु छन्दःप्रवचनं गुरुतर्कश्रुतित्रितयाश्रितं भवति। तथा चोक्तमुवटेन[2]—

गुरुतस्तर्कतश्चैव तथा शातपथश्रुतेः।
ऋषीन् वक्ष्यामि मन्त्राणां देवताश्छान्दसं च यत्॥ इति।

छन्दसां विभागः

छन्दो द्विधा, वैदिकलौकिकभेदात्। तथा चोक्तमुपनिदानसूत्रे—'छन्दसामार्षं लौकिकं च' इति।[3] आर्षमिति वैदिकम्। तच्च—"गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगतीति सप्तार्षाणि"[4] इति सप्त, अतिच्छन्दांसि चेत्येवं मुख्यम्। अतिच्छन्दांस्युपनिदानसूत्र एवं परिगणितानि[5]—

१. तै० सं० १।१।१३ पृ० २०१
२. माध्यन्दिनीयसंहिताभाष्यारम्भे
३. उ० सू० १।५ ४. उ० सू० १।२ ५. उ० सू० २।१४-१५

"अथातिच्छन्दांसि भवन्ति-अतिजगती शक्वर्यतिशक्वर्यष्टिरत्यष्टिर्धृतिरतिधृतिः कृतिः प्रकृतिराकृतिर्विकृतिः संकृतिरभिकृतिरुत्कृतिरिति।"

न नु सप्तार्षाणीत्येव सूत्रोक्तत्वादतिच्छन्दसामार्षत्वं कथमिति शङ्कनीयम्। अथातिच्छन्दांसि भवन्तीत्यत्र आर्षाणीत्यध्याहारोऽवश्यं भवति। अन्यथा किं भवन्तीत्याकांक्षाया उपस्थितिः स्थिरा स्यात्। तथा हि 'गायत्र्यादीनामुत्कृतिरवसानम्'[1] इति च प्रतिपादनादतिच्छन्दसामपि वैदिकत्वं स्फुटमवगम्यते। लौकिकं तु च्छन्दो लघुगुरुमात्रावर्णादिनियामकम्।

लौकिकमपि छन्दो द्विविधम्, मात्रा-वर्णभेदात्। यत्तु केचिन्मात्राच्छन्दो गणच्छन्द इति द्वेधा विभागमभिप्रयन्ति तत्तु न समीचीनं प्रतिभाति। तादृशविभागे ह्येकाक्षराणां श्र्यादिच्छन्दसामसङ्ग्रहापत्तेः। वृत्तरत्नाकरेऽपि—

पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते॥ (१।४)

इत्यनेन द्विधैव विभागोऽभिप्रेतः। छन्दोमञ्जर्यामपि वृत्तजातिरूपेण विभागद्वयमेवंविधमेव। तथा हि—

पद्यं चतुष्पदो तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥ इति।

मात्रावर्णच्छन्दस्त्वेन च विभागे मात्रासु गणच्छन्दसामपि संग्रहो भवतीति लौकिकच्छन्दसो मात्रावर्णद्वैविध्यमेव युक्तम्। अन्ये तु गण-मात्राक्षरच्छन्दस्त्वेन त्रैविध्यमाहुः। तथा चोक्तम्—

आदौ तावद् गणच्छन्दो मात्राच्छन्दस्ततः परम्।
तृतीयमक्षरच्छन्दश्छन्दस्त्रेधा तु लौकिकम्॥ इति।

पिङ्गलाचार्योक्तशास्त्रे त्रिविधच्छन्दसां विभागो हलायुधेनैवं वर्णितः—

आर्याद्युद्गीतिपर्यन्तं गणच्छन्दः समीरितम्।[2]
वैतालयादि चूलिकान्तं मात्राच्छन्दः प्रकीर्तितम्।[3]
समान्याद्युत्कृति यावदक्षरच्छन्द एव च॥ इति।[4]

१. उ० सू० १।४
२. आर्याताः उद्गीतिः, पि० छ० सू० ४।१५-३२
३. वैतालीयतश्चूलिका, पि० छ० सू० ४।३३-५३
४. पि० छ० सू० ४।११ हलायुधोक्तिः

अत्र गणच्छन्दो नारी-मृगी-कन्यादि।[1] मात्राच्छन्द आर्यादि। अक्षरच्छन्दः श्र्यादि[2]। अत्रापि गणच्छन्दसां मात्राच्छन्दःसु सङ्ग्रहान्मात्राच्छन्दो वर्णच्छन्द इत्येवमेव लौकिकछन्दोद्वैविध्यं युक्ततरम्।

लौकिकच्छन्दोविभागपरिशीलनेनेदं पर्यवस्यति यदक्षरच्छन्दसः सर्वथाऽनिवार्यत्वम्। ततश्च 'यदक्षरपरिमाणं तच्छन्दः' इत्येवं वैदिकच्छन्दशास्त्रोक्तपरिभाषणमेव वाङ्मयच्छन्दसां निर्दुष्टं लक्षणम्। वर्णेष्वेव मात्राया अन्तर्भावात् वर्णं विना मात्राऽसद्भावाच्च वर्णच्छन्दस एव मुख्यत्वम्। वर्णच्छन्दसश्च वैदिके गद्यपद्योभयाच्छादकत्वात् वेदभागस्य छन्दोऽभिधानम्। लौकिकसाहित्ये तु परवर्तिभिरालङ्कारिकैः प्रायः पद्यभाग एव च्छन्दांसि निर्दिष्टानि एकदेशीयतयेति विशेषः।

गणास्तु छन्दश्शास्त्रे मादयोऽष्टावुक्ताः। एतेषां स्वरूपं बहुत्रोक्तम्। तथा हि छन्दोमञ्जर्याम्—

मस्त्रिगुरुस्त्रिलघुश्च नकारो,
भादि गुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः,
सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥ इति।

अन्यत्रापि च—

आदिमध्यावसानेषु भजसा यान्ति गौरवम्।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम्॥ इति।

अत्र गुरुलघुलेखनप्रणाली तु वृत्तरत्नाकरे एवमुपदिष्टा[3]—'ग्वक्रो, ज्ञेयोऽन्यो मात्रिको लघुः' इति। अस्यायमर्थः-ग्=गुरुः वक्रः=कुटिलरेखया, नागराक्षरे यथा अकारप्रश्लेषचिह्नमस्ति (ऽ) तद्वत् ज्ञेयः=लेखने बोध्यो लेख्यश्च। अन्यः=अनुस्वारादिभ्योऽन्यः ल्=लघुः मात्रिकः=मात्रारूपः ऋजुरेखारूप इति यावत्, अवगन्तव्यः। तथा च लघोश्चिह्नम् 'ा' इति, गुरोश्चिह्नं च 'ऽ' इति भवति। अन्ये तु—गुरुः ॅ इत्थं, लघुश्च—इत्थं लेख्य इति मन्वते। उदाहरन्ति च वाणीभूषणोक्तम्—

१. द्र० पि० छ० सू० ६।४
२. द्र० पि० छ० सू० ६।२
३. वृ० र० १।९

गुरुस्तु द्विकलो ज्ञेयो गजदन्तसमाकृतिः।
लघुस्तदन्यः शुद्धोऽसावेकमात्रः प्रकीर्तितः॥ इति॥
अत्र लेखने परम्परानुसारो व्यापार उदाहार्यः।

व्यूहः

सामान्यतोऽक्षराणां संख्यामाश्रित्य छन्दसां पादा निर्धार्यन्ते। परं वैदिकमन्त्रेषु नास्ति मानवीयरचनासम्बन्धः। अतस्तत्र मन्त्राणां यथास्थिते परम्पराप्राप्ते पाठे छन्दसस्तत्पादानाञ्चानुसन्धानं क्रियते ऋषिभिर्मनीषिभिश्च। यद्यपि भूयांसो मन्त्राः शास्त्रोक्तस्य कस्यापि च्छन्दसः पादाक्षरगणनया सङ्गता भवन्ति। तथापि कतिपये मन्त्रास्त्वेतादृशा अपि दृश्यन्ते येषां पादाक्षराणां संख्यायामेकस्य अक्षरद्वयस्य वा नैयून्यं भवति। तदवस्थायां छन्दःसङ्गत्यै पादाक्षरगणनापूर्त्यै च व्यूहः क्रियते।

वैदिकच्छन्दःशास्त्रपरिभाषणे 'व्यूह' इति विशिष्टः शास्त्रकृतसंकेतः। शब्दार्थदृष्ट्या तु वि=अभिप्रायविशिष्टः ऊहः=अक्षरागमो व्यूह इत्येवं निर्वक्तुं शक्यते। छन्दश्शास्त्रीयव्यूहसङ्केते मन्त्रपदेषु वर्तमानाक्षरसंख्यापेक्षानुकूल्येन सन्धिविच्छेदः सन्धिप्रकल्पनं वा क्रियते। पिङ्गलाचार्यवर्यस्तु नैव व्यूहशब्दं प्रायुङ्क्त। शौनककात्यायनाद्याचार्यग्रन्थेषु परवर्तिमनीषिभाष्यादिषु समस्ति व्यूहपदप्रयोगः। आचार्यपिङ्गलवर्येण विशिष्टसन्धिकलायाः छान्दस्याः समुल्लेखपुरस्सरं पूरणाख्यस्पष्टसंज्ञयाक्षरसंख्यापरिपूर्त्यै व्यूहविधानुमपदिष्टम्। परमत्र सूत्रे सन्धिविच्छेदो न स्फुटीकृतोऽपितु आदिपदेन निर्दिष्टः[1]। व्यूहस्य केचन भेदविशेषाः अत्र समुपस्थाप्यन्ते।

सन्धिकल्पनात्मकव्यूहः

यत्र पदेषु वर्णान्तरैः सह यकारवकारावन्त्यसंयुक्ताक्षरत्वेन भवतस्तत्र यकारवकारसंयुक्तवर्णयोः क्रमशः इकारोकारयोरागमो (विशेषप्रक्षेपो) भवति। एवं हि परवर्त्तिन्यूनाक्षरसंख्यायाः पूर्त्तिः क्रियते। यथा–वरेण्यम्–वरेणियम्, स्वः–सुवः, वीर्यम्–वीरियम्, कन्या—कनिया, इत्यादौ।

प्रातिशाख्येषु शिक्षाग्रन्थेषु च जात्यस्वरितो विवेचितः[2]। जात्यस्वरिते यवकारयोः संयोग आवश्यकः[3]। जात्यस्वरितस्थितिमनुलक्ष्य वयं

१. इयादिपूरणः (पि० छ० सू० ३।२)
२. अतोऽन्यत् स्वरितं स्वारं जात्यमाचक्षते पदे (ऋ० प्रा०)
३. एकपदे नीचपूर्वः सयवो जात्यः (वा० प्रा०)

प्रतीमो यज्जात्यस्वरितस्थलेषु इयुवादिविश्लेषं कल्पयित्वा पादाक्षरपूर्त्तिं-व्यूहेन भवति। स्मार्तमन्त्रेष्वप्येवंविधो व्यूह उपदिश्यते प्राचीनाचार्यैः। यथा 'घृणिः सूर्य आदित्यः' इत्यस्य मन्त्रस्याक्षरसंख्याने घृणिरिति द्वे अक्षरे, सूर्य इति त्रीणि, आदित्य इति त्रीणि, 'एतद्वै सावित्रस्याष्टाक्षरं पदं श्रियाभिषिक्तम्' इति श्रुतिरपि साधिकात्रेति ज्ञेयम्[1]।

सन्धिविच्छेदमूलकव्यूहः

अकारादिस्वरवर्णानां परस्परमेकादेशसन्धिद्वारा अक्षरसंख्यासङ्कोचो भवति। एतादृशस्थले व्यूहेन पदगतसंकोचं पृथक्कृत्याक्षरसङ्ख्यया पूरणं मन्यन्ते आचार्याः[2]। अकारादिस्वरसन्धिः स्वरद्वयस्यैकत्वविधायकः पञ्चविधः–यण्गुणवृद्धिपूर्वरूपपररूपभेदात्। यण्सन्धयः प्रातिशाख्यशिक्षादौ क्षैप्राभिधानेनोक्ताः। अत्रैकपदसन्धौ कस्मादपि स्वरवर्णात्पूर्वाः इ उ ऋ ऌ वर्णाः क्रमशो यवरलरूपेण परिणताः भवन्ति। तत्र व्यूहे पादपूर्त्यर्थमादिष्टयकाराद्यन्तःस्थवर्णानां मूलं स्वरात्मकं रूपमवधार्याक्षरसंख्यापूरणं भवति यथा—प्रयत्यध्वरे–प्रयतिअध्वरे, अप्स्वन्तरमृतम्—अप्सुअन्तरमृतमित्यादि।

अत्र ऋऌकारयोरुदाहरणान्यन्वेषणीयानि। अत एव उवटाचार्यो रेफलकारयोर्व्यूहं न मन्यते। देवयाज्ञिकाचार्यस्तु यण्सन्धिव्यतिरिक्तस्थलेऽपि क्षैप्रसन्धिवद्रेफे स्वरं संयोज्य व्यूहमुपदिशतीति विशेषः। तथा हि—समश्वपर्णाश्चरन्ति—समश्वपरणाश्चरन्तीत्यादौ।

गुणसन्धिस्थले व्यूहोदाहरणं तु—प्रेता जयता-प्रइता जयता इत्यादि।

वृद्धिस्थले व्यूहः—प्रैतु ब्रह्मणस्पतिः—प्रएतु ब्रह्मणस्पतिः इत्यादौ दृश्यते। दीर्घसन्धिव्यूहः–परि माग्ने-परि माअग्ने इत्यत्र वर्तते। पूर्वरूपव्यूहोदाहरणम्—अधिब्रवन्तु तेऽवन्त्वस्मान्—अधिब्रुवन्तु ते अवन्त्वस्मान्, इत्याद्यवगन्तव्यम्।

अभ्यासात्मको विशेषव्यूहः

छन्दःशास्त्रीयग्रन्थेषु अभ्यासात्मकव्यूहस्योल्लेखो नास्ति। परन्तु कतिपयस्थलेषु आचार्यैरभ्यासात्मकव्यूहो निर्दिष्टः। यथा 'द्युम्नानि' इति

१. द्र० संस्काररत्नमालायाम् पृ० २३२
२. व्यूहैः सम्पत्समीक्ष्योने क्षैप्रवर्णैकभाविनाम् (ऋ० प्रा० ८।४०)
व्यूहेदेकाक्षरीभावान् पादेषूनेषु सम्पदे (ऋ० प्रा० १७।२२)
क्षैप्रवर्णांश्च संयोगान् व्यवेयात् सदृशैः स्वरैः (ऋ० प्रा० १७।२३)

पदे देवयाज्ञिकेन 'ना' इत्यस्य द्विरावृत्त्या अक्षरसंख्यापूर्त्तिरुपदिष्टा ।[1] एष तु विशेषो व्यूहः ।

व्यूहानुपलब्धौ विशेषसंज्ञा

मन्त्रेषु व्यूहस्थलानुपलब्धौ, व्यूहद्वारा समपेक्षिताक्षरसंख्यापूर्त्त्यसंभवे मतान्तरेण कुत्रचिद् व्यूहेच्छाराहित्ये वा अक्षरगणनायामेकाक्षरन्यूनत्वे सति निचृदितिविशेषणेन, अक्षरद्वयस्य न्यूनत्वे सति विराडितिविशेषणेन तत्तच्छन्दोऽभिधीयते । एवं हि छन्दसो भेदविशेषाः निचृद्गायत्र्यादिरूपेणोक्ताः । संज्ञाविशेषेण पादादिपूर्त्तौ सर्वं सङ्गतं भवति न्यूनाधिक्यम् । एवमेव एकाक्षराधिक्ये भूरिगितिविशेषणमक्षरद्वयाधिक्ये तु स्वराडितिविशेषणमुक्तमाचार्यैः ।[2]

व्यूहसाङ्कर्ये नियमः

कस्मिंश्चिन्मन्त्रेऽक्षरसंख्यान्यूनतया व्यूहप्रसङ्गस्तत्रापि बहुविधव्यूहप्रप्तिर्भवति । तादृशस्थले सन्धिप्रकल्पनात्मकव्यूहापेक्षया सन्धिविच्छेदात्मकव्यूहस्य प्राथम्यम् ।[3] अथ च सन्धिविच्छेदात्मकव्यूहानैक्ये सति प्रथमप्राप्तव्यूहस्यैव प्रामुख्यमितरापेक्षया । प्रथमपठितस्थले, स्थलान्तरेषु प्रथमपठितेषु वा व्यूहेनाक्षरसंख्यापरिपूरणानन्तरं परपठितस्थले व्यूहो न शास्त्रकृद्भिरनुमतोऽनवस्थाभयादित्यवधार्यम् ।[4]

प्रपदमुच्चारणम्

ऐतरेयब्राह्मणे श्रूयते 'ऐन्द्रीः प्रपदं जुहोति' इति ।[5] अत्र प्रपदमुच्चारणनियमः । प्रकृष्टं पदं प्रपदम् । तथा चाहुः—

पादा यस्यास्तु यावन्तो यावदक्षरसम्मिताः ।
ऋच्यध्ययनमेतेषां प्रपदं तद्विदुर्बुधाः ॥ इति ।

१. मा० सं० २६।१८—एना विश्वान्यर्य आ द्युम्नानि
२. तदसम्भवे न्यूनाधिकेनैकेन निचृद्भुरिजौ द्वाभ्यां विराट्स्वराजौ इत्युपायेन छन्दः कल्पनीयम् (य० सर्वानु० सू० ११ देवः); द्र० पिंगलछन्दःसूत्रेऽपि
३. प्राकृतसान्ध्ययोः सान्ध्यो विकृष्यः (का० छ० सू० १।६ देवः)
४. अगोह्यस्य यदसस्तना गृहे (ऋ० १।१६१।११) इत्यत्र द्वौ क्षैप्रवर्णसंयोगौ । तत्र पूर्वस्मिन् व्यवायेन सम्पदः सिद्धेरुत्तरस्मिन् न कर्तव्यो भवति (ऋ० प्रा० १७।२३ उवटभाष्ये), सदृशयोस्तु पूर्वो विकृष्यः (का० छ० सू० १।६ देवः)
५. ऐ० ब्रा० ३७।७ (पृ० ९२३)

अतः प्रपदशब्देनाक्षरपादादिवैकल्यरहितं लक्षणानुगुणं छन्दसः [illegible] रणमभिधीयते । तत्र [illegible] अरिष्ट्यै, अज्यायै, अभ्रयाय च कल्पत इति तत्रैव फलश्रुतिः ।

वैदिकदृष्ट्या गायत्रीस्वरूपविमर्शः

गायत्री वेदजननी गायत्री पापनाशिनी ।
गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम् ॥[1]

इत्यादिभिरनल्पैर्विषयमन्त्रात्मिकायाः गायत्र्याः माहात्म्यविषये सुपरिचिता एव सर्वे । निरुक्तदृष्ट्या गायत्रीतिपदस्य गायन्तं त्रातीति निर्वचनं सम्पद्यते ।[2] गायन्तं स्तुवन्तं स्वस्योपासकं जनं त्राति पाति रक्षतीति गायत्रीपदमन्वर्थम् । न केवलं स्वस्योपासकस्यापितु कस्यामप्युपासनायां (स्तुतौ वा) संलग्नस्य भक्तस्य त्राणं गायत्र्या भवत्येवेत्यपि निर्वचनेनानेन ध्वन्यते । अत एव शैवशाक्तवैष्णवादीनां समेषामपि भारतीयानामर्हणां कृते सन्ध्यान्तर्गतो गायत्रीजपः नित्यकर्मणि सन्निवेशितः पूर्वाचार्यैः ।

शतपथश्रुतिषु[1] 'गयास्तत्रे' इत्यन्येनापि निर्वचनेन पूर्वोक्तमेव तथ्यं स्पष्टीकृतम् । इयं हि गायत्री मनुष्याणां प्राणरक्षिणी । गयाः प्राणाः उच्यन्ते तानेवेयं जापकस्य रक्षतीति गायत्रीजपस्यावश्यकत्वं परोक्षवृत्त्या श्रुतिर्लक्षयति ।

कलेः प्रभावाद् हिन्दुत्वस्यैव मुमूर्षुत्वमस्माभिरनुदिनमनुभूयते, का खलु कथा गायत्रीजपस्य । अथायमपरो गण्डस्योपरि स्फोटो यन्नास्तिकबहुलेऽस्मिन्जनरत्नाकरे ये केचन रत्नभूता भूसुरास्तत्रापि संस्कृतज्ञा नित्यकर्मपरायणा दृश्यन्ते तेऽपि गायत्रीजपविषये सन्देहपदमेव धारयन्ति । तेषामेवाराधनायात्र विषयो विशदीक्रियतेऽस्माभिः ।

गायत्रीजपे पञ्चानां षण्णां वा प्रणवानामेव प्रयोगः कर्तव्यः, एकेन द्वयेन वा प्रणवेन संयुक्ता गायत्री नैव हिताय भवतीति मतमाख्यापयन्तः सुधियः स्वस्मिन् वैदुष्यमावहन्ति । अत्रास्माकं विमर्शस्तथा हि

१. पद्मपुराणे स्वर्गखण्डे ५३।५८
२. नि० ७।१२।५
३. श० ब्रा० १४।८।१५।१७

राजर्षिर्मनुः—

एतदक्षरमेताञ्च जपन् व्याहृतिपूर्विकम्।
सन्ध्ययोर्वेदविद् विप्रो वेदपुण्येन युज्यते ॥[1]

इति वदन् एकस्यैव प्रणवस्य गायत्रीजपे विधानमुपदिशति। श्रीमच्छङ्कराचार्येण गायत्र्युच्चारणधर्मोपदेशं प्रक्रम्य जपप्रकार एवमुक्तः—

प्रणवं पूर्वमुच्चार्य भूर्भुवःस्वस्ततः परम्।
गायत्रीं प्रणवं चान्ते जप एष उदाहृतः ॥ इति।[2]

एतेन प्रणवद्वययुता गायत्री जपकाले प्रयोक्तव्येति स्पष्टं ज्ञायते।

बृहत्पाराशरे तु—

प्रणवो भूर्भुवः स्वश्च पुनः प्रणवसंयुतम्।
अन्त्योङ्कारसमायुक्तो मन्यन्ते मुनयोऽपरे ॥[3]

इत्येवं प्रणवत्रयस्य गायत्र्यां प्रयोगः समुपस्थापितः। अन्ये विद्वांसः—

पञ्चप्रणवसंयुक्तां जपेदित्यनुशासनम्[4]

इत्यादीनि वचनान्यनुसृत्य पञ्चप्रणवैरेव गायत्रीजपमनुशासयन्ति। अथ च—

सम्पुटैका षडोङ्कारा गायत्री विविधा मता[5]

इतिवचनेन गायत्र्याः षडोङ्कारयुतत्वं बहुविधत्वमपि स्फुटीभवति। एवं हि मतवैभिन्न्ये मतिवैभिन्न्यमपि कर्मपरायणानां भवितुमर्हतीत्यत्र कश्चन ऋजुः पन्था अनुसन्धेय एव।

१—अत्र पञ्चादिप्रणवपक्षः रत्नावल्यां समुपस्थाप्य 'सम्पुटा च षडोङ्कारा भवेतामूर्ध्वरेतसाम्' इत्येवमपास्तः।[6] नहि जपे पञ्चषट्प्रणवानां संयोजनं गृहस्थैर्ब्रह्मचारिभिश्च कर्तव्यमित्यनेन सिद्धान्तितम्।

---

१. म० स्मृ० २।७८
२. भा० पु० प० पृ० ६०
३. पृ० ११ पु० ४४ श्लो० ५, प्राणतोषिण्यां पृ० ३५७
४. दे० भा० (सन्मार्गे वेदविशेषाङ्के) पृ० ११७
५. तत्रैव
६. स्मृतिरत्नावल्याम् (स्मृतिमुक्ताफलस्याह्निककाण्डे पृ० ३३८)

२—प्रणवत्रय-प्रणवद्वयपक्षौ मनोक्तस्वीतिपक्षमानार्षमप्रमाणयन्तः पितावैतिहासिकदृशा न श्रेष्ठयं प्रजतः। मनुर्हि सर्वप्रथमो धर्मशास्त्रकारः। तस्यैवोक्तिः समादरणीयेति 'अभ्यर्हितं पूर्वम्' इति न्यायेन जैमिनिरभिप्रैति। 'ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा' इत्येवं गायत्रीमन्त्रस्यापि वेदत्वसाधान्यादाद्यन्तप्रणवपक्षोऽपि मनुसम्मत एव।

३—गायत्रीमन्त्रो वाजसनेयादिसंहितासु प्रतिपदमुक्तः[1]। अस्योच्चारणं कथं कर्तव्यमित्यत्र गुरुमुखोच्चारणानुच्चारणपरम्परैव प्रमाणम्। अन्यथा हि तस्य वेदत्वमेव व्याहन्येत। व्याहते च वेदत्वे कथं वेदमातृत्वं कथं च माहात्म्यातिशयोपदेशः गायत्र्याः सम्भवति। वस्तुतस्तु वेदमातुः सावित्र्याः यादृशः स्वशाखीयः पाठः अन्तप्रणवरहितस्तथैव जपनीयः। नात्र पौराणिकैः स्वनासानिवेशः सम्पादनीयः।

४—"त्रिकेणैव जपः कार्यो जपयज्ञप्रसिद्धये"[2]

"तत्रैकप्रणवा ग्राह्या गृहस्थैर्जपकर्मणि।
गृहस्थवत्तु जप्तव्या सदैव ब्रह्मचारिभिः ॥"[3]

"गृहस्थो ब्रह्मचारी च प्रणवाद्यामिमां जपेत्।
अन्ते यः प्रणवं कुर्यान्नासौ वृद्धिमवाप्नुयात् ॥"[4]

इत्यादिवचनैः ब्रह्मचारिगृहस्थानां कृते एकप्रणवयुतस्यैव गायत्रीजपस्य विधानमुल्लिखितमाचार्यैः। आद्यन्तप्रणवोच्चारणमधिकप्रणवोच्चारणं वा फलभूयस्त्वाय गुरोस्तथाप्राप्तमन्त्राय वा भवितुमर्हति। नैव नियमः।

५—अथवा भवतु नाम पञ्चप्रणवोच्चारणपक्षः। परमत्र वेदमन्त्रे के पञ्चप्रणवा भवितुमर्हन्तीत्यनुसन्धेयम्। वेदोच्चारणप्रकारः शिक्षयोपदिश्यते[5]।

---

१. ऋ० ३।६२।१०, यजु० ३।३५, २२।९, ३०।२, ३६।३, तै० सं० १।५।६।४, ४।१।११।१; साम० १४६२
२. स्मृतिरत्ने
३. स्मृतिरत्नावल्याम्
४. स्मृतिसारसमुच्चये
} स्मृतिमुक्ताफले आह्निककाण्डे पृ. ३३८
५. स्वरवर्णाद्युच्चारणप्रकारो यत्र उपदिश्यते सा शिक्षा (ऋ० भा० भू० सायणः)

याज्ञवल्क्यशिक्षायां वेदारम्भप्रसङ्गे उक्तम्—

प्रणवं पूर्वमुच्चार्य व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुपूर्व्याण तत्तो वेदान् समारभेत् ॥ इति ।[1]

श्लोकेऽस्मिन् व्याहृतित्रयस्य सावित्र्याश्चापि प्रणवत्वमेव वक्तुं शक्यते, वेदस्वाध्यायस्यादावुच्चार्यमाणत्वात् । अत एव श्रावण्यामुपाकर्मणि 'दशप्रणवसहितानामिष्टयजुर्ब्राह्मणान्तानाम्' इत्यत्र आद्यप्रणवपञ्चकत्वेन सप्रणवस्य सव्याहृतिकस्य सवितृदेवताकस्य मन्त्रस्यैव ग्रहणं भवति[2] । एवं हि 'पञ्चप्रणवसंयुक्तां जपेदित्यनुशासनम्' इत्यत्रानुशासनशब्देन शिक्षानुशासनेनैकप्रणवयुक्तायाः सव्याहृतिकायाः गायत्र्याः संयुक्तायाः (संहितात्वेन) एव जपे विनियोगः कर्तव्य इत्येव फलति ।

माध्यन्दिनीयसंहितायां (३६।३) व्याहृतित्रयसहितस्यैव गायत्रीमन्त्रस्योल्लेखः । एतेनेदं ज्ञायते यत् स्रवत्यनोङ्कृतं ब्रह्मेत्यादिना पूर्वं पश्चाच्च प्रणवस्य संयोगः कर्तव्य इति ।

एवं पूर्वोक्तेन युक्तिप्रमाणकदम्बेन साम्प्रतिके काले प्रणवैकयुतायाः प्रणवद्वययुताया वा गायत्र्याः सामान्यजपः समुचितः इत्यस्माकमस्ति सम्मतम् । ये तु द्व्यष्टिकप्रणवयुतस्यैव गायत्रीमन्त्रस्य जपे विनियोगमावश्यकमामनन्ति ते निरभ्रे नभोमण्डले अरविन्दसन्दर्शनमेव कुर्वन्तीति प्रतिभाति ।

गायत्रीमन्त्रस्य जपे तत्सवितुरित्यृचः प्रथमे पादे वरेण्यमिति शब्दः प्रयोक्तव्यो वरेणियमिति वेत्यत्रापि विचिकित्सा भवति । जपे वरेण्यमित्येव शब्दः प्रयोक्तव्य इत्यस्माकं विमर्शः । यतो हि—

१—मन्त्रे यादृक् स्वरूपं पदस्य वर्तते तादृगेव व्यवहर्तव्यम् । माध्यन्दिनीयशाखायां बहुषु स्थानेषु पठितोऽयं मन्त्रः[3] वरेण्यमितिस्वरूपेणैव दृश्यते, सम्प्रदायविद्भिश्च तथैव पठ्यते । मन्त्रस्वरूपपरिवर्त्तने फलनिष्पत्त्यभावः अनिष्टापत्तिश्च सम्भवतीति—

१. या० शि० २२
२. द्र० स्वी० सं० ५।१।९६ पृ०
३. ३।३५, २२।९, ३०।२, ३६।३

मन्त्रो हीनः स्वरतो वर्णतो वा,
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥[1]

इति शिक्षावचनेन स्पष्टमेव ।

२—वरेण्यमितिपाठे गायत्रीच्छन्दसो लक्षणेऽष्टाक्षरपादत्वं यदुक्तं[2] तद् व्याहतं भवतीत्यपि न युक्तम् । न ह्येकाक्षरेण हीनेन छन्दो हीयते[3], अपितु 'ऊनाधिकेनैकेन निचृद्भूरिजौ' इति[4] नियमेन निचृत्त्वविशेषणं तत्र दातुं शक्यते । परं निचृदादिविशेषणं पूर्वाचार्यैरपि सर्वत्र नानुमतम् । सर्वानुक्रमादिषु नियमस्यास्योपदेशेऽपि तद्घटितस्थलेषु प्रायशो विशेषणविरहेणैव च्छन्दसामुपदेशः । एवञ्च विनियोगे निचृद्विशेषणस्योच्चारणं सम्प्रदायो नाद्रियते । न वा तद्दोषाय कल्पते । तस्माद् वरेण्यमिति पाठे न का चन छन्दोहानिः ।

३—यत्तु 'इयादिपूरणः' इति पिङ्गलानुशासनेन[5] तत्समानार्थकच्छन्दोग्रन्थानुशासनेन च छन्दसोऽक्षरपूर्त्तौ व्यूहविधानं निरर्थकं भविष्यतीति चेन्न । व्यूहोपदेशो हि पौरुषेयग्रन्थेषु निर्दिष्टोऽपौरुषेयमन्त्रेषु बलवत्सु पाठपरिवर्तनं कर्तुं न क्षमते । सो ह्युपदेशः छन्दसो लक्षणं कथं तत्र समन्वेतव्यमित्येतस्याः शङ्कायाः समाधाने एव तात्पर्यं दधाति । अत एव श्रौतेषु कर्मसु ब्राह्मणेषूपदिष्टा छन्दःसम्पत् व्यूहकृताक्षरसम्पच्च न प्रयोगकाले मन्त्रस्वरूपविपर्ययं कृत्वा समाद्रियते । एतस्मादपि वरेण्यमित्येव पाठो निश्चीयते । छन्दःपूर्तिज्ञानं तु स्वतन्त्रमेव जिज्ञासासमाधानरूपं दृष्टं फलं, व्यूहात्मकस्वरूपज्ञानजनितं नियमादृष्टं वा फलं जनयितुं प्रभवति ।

१. पा० शि० ५२
२. अष्टाक्षरा वै गायत्री (श० ब्रा० १।४।१।३६)
३. द्र० श० ब्रा० १२।२।३।३, ऐ० ब्रा० १।६; २।३७; कौ० २७।१
४. पि० छ० सू० ३।५४
५. पि० छ० सू० ३।२

४—श्रौतेतरकर्मसु जपशब्दस्तानस्वरेणैव मन्त्रस्यासकृदावर्तनात्मकं स्वरूपं धत्ते। तानस्वरे च मन्त्रोपदिष्टोदात्तादिस्वर-मन्त्रद्वित्वोच्चारणाद्यभावः। अर्थानुसन्धानधिया कर्तव्ये जपे 'अर्थवेलायां प्रकृत्या' इति प्रतिज्ञापरिशिष्टोक्तकात्यायनवचनानुसारं प्रकृत्याशब्दः इयादिपूर्तिमपि निवारयति।

५—गायत्रीजपादौ वेदोच्चारणधर्मविरहितो मन्त्राक्षर एव यदा प्रयुज्यते, तदा तत्र छन्दःपूर्तिधर्माणां कथं प्रवेशः सम्भवति। व्यूहरूपस्य छन्दोधर्मस्य न वेदाश्रितत्वं, किन्तु ज्ञानाश्रितत्वमेव। अत एव—

आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे॥

इति[1] वेदनमात्रोक्तेः। वेदनं हि न निष्फलम्, मीमांसकैरश्वमेधादिषु वेदनविधेश्चारितार्थ्यविधानात्, अथ विज्ञायैतानि योऽधीते तस्य (कर्म) वीर्यवत्तरं भवतीति श्रुतेश्च। अत एव छन्दःसम्पदोऽज्ञानेऽपि न मन्त्रजपजनितं पुण्यं हीयते न वा ज्ञानस्य प्रयोगो भवत्येवेति नियमः।

६—केचन 'पाठकाले वरेण्यं स्याज्जपकाले वरेणियम्' इति वचनमुपन्यस्य जपे वरेणियमित्युच्चारणं समर्थयन्ति। तदप्यविचारितरमणीयमेव। एतादृशपाठस्य मानुषत्वात्, शतपथब्राह्मणे मानुषपाठस्य प्रयोगकालेऽनुच्चारणीयतायाः सामान्यतो नियमात्। सति वा वचनस्य प्रामाणिकत्वे शाखान्तरविषयताऽवगन्तव्या। न माध्यदिनीयशाखानुयायिनां कृते एतस्य प्रामाण्यं सम्भवतीति विमर्शः।

छन्दस आधिदैविकं स्वरूपम्

छन्दसां व्यापकत्वादत्रोपासनाक्रमे समपेक्षितमेव किञ्चनाधिदैविकं स्वरूपम्। तदेतच्छन्दो विराट्पुरुषस्य प्रजापतेरवयवत्वेन सर्वतः प्रथममैतरेयश्रुतौ विग्रहवदुपकल्पितम्। तद्यथा—'प्रजापतेर्वा एतान्यङ्गानि यच्छन्दांसि' इति।[2] देवशास्त्रे स्वतन्त्रोऽपि छन्दःपुरुषः पापापनोदनपरः समुपास्यते। ब्रह्मयज्ञारम्भे यथाविधि स्नात्वा छन्दःपुरुषमेनोनिर्णोदनं शरीरे

१. सं० दी० पृ० १२ याज्ञवल्क्यवचनम्
२. ऐ० ब्रा० २।१८

न्यसेदित्यभियुक्ता उपदिशन्ति। पौराणिकैस्तु विष्णुरेव छन्दःपुरुष इत्यवधारितम्।[1] तथा हि स्वरूपमपि निर्दिष्टं छन्दोदेवस्य—

जपाकुसुमसङ्काशं छन्दो ज्ञेयं विपश्चिता।
चकोरास्यं जपाक्षं तु शक्तिं बिभ्रच्छिखान्विताम्।
लोहकुण्डलकोपेतं प्रवालकृतकुण्डलम्॥ इति।[2]

छन्दोवर्तिनां गणानामप्यधिष्ठातृदेवताः अभियुक्ता अभिप्रयन्ति। तदनुसारञ्च फलादिकमपि निर्दिशन्ति यथा—

मो भूमिस्त्रिगुरुः श्रियं दिशति यो वृद्धिं जलं चादिलो,
रोऽग्निर्मध्यलघुर्विनाशमनिलो देशाटनं सोऽन्त्यगः।

तो व्योमान्तलघुर्धनापहरणं जोऽर्को रुजं मध्यगो,
भश्चन्द्रो यश उज्वलं मुखगुरुर्नो नाम आयुस्त्रिलः॥

फलमिदं काव्यनायकस्य, काव्यरचयितुः, पठितुर्वा यथायोग्यं व्यस्तं समुच्चितं वा बोध्यम्। तथा हि यत्र काव्यकर्तुः प्राचीनो नायकः स्वकल्पितोदेवतादिर्वा तत्र कर्तुः श्रोतृणां चेत्यादि यथायथमुन्नेयम्।

अथ च यदि दैवाद् दुष्टफलो गणः काव्यादौ प्रयुक्तस्तदा तस्य दुष्टफलजनकस्य रक्षणार्थं तत्फलनिरासार्थं च द्वितीयो गणः शोध्यः। तत्र मगणनगणौ मित्रसंज्ञौ, भगणयगणौ भृत्यौ, जगणतगणावुदासीनौ, रगणसगणौ शत्रू नीचसंज्ञौ च भवतः। तथा चोक्तम्—

मनौ मित्रे भयौ भृत्यावुदासीनौ जतौ स्मृतौ।
रसावरी नीचसंज्ञौ द्वौ द्वावेतौ मनीषिभिः॥ इति।[3]

एवमेव गणयुगफलमपि शास्त्रेषु प्रतिपादितचरम्। तथा हि यदि मित्रगणान्मित्रगणस्तदा धनसमृद्ध्यादिफलम्, मित्रगणाद् भृत्यगणे जयादिशुभम्, मित्रादुदासीने शून्यकम्, मित्राच्छत्रौ बन्धुपीडा, भृत्यान्मित्रे सर्वकार्यसिद्धिः, भृत्याद् भृत्ये सर्वो लाभः, भृत्यादुदासीने धननाशः, भृत्याद् वैरिणि शोकः, उदासीनान्मित्रे किञ्चिदेव कार्यसिद्धिः, उदासीनाद् भृत्ये सर्वे नाशाः, उदासीनादुदासीने न शुभं न चाशुभम्, उदासीनाच्छत्रौ स्वजनवैरम्,

१. छन्दो विष्णुस्तथैवाग्निरधिदेवता (वा. ३६९८)
२. द्र० वा. को. ३६९७
३. प्राकृतपैङ्गले ३५

शत्रोर्मित्रे शून्यकम्, शत्रोर्भृत्ये गृहिणीनाशः, शत्रोरुदासीने स्वकुलक्षयः, शत्रोः शत्रौ काव्यनायकलाभो भवति। तदुक्तं समासेन—

मित्रान्मित्रादयः स्युर्यदि धनमुदयं शून्यकं बन्धुपीडां,
भृत्यान्मित्रादयश्चेद् धृतिमधिकगुणं हानिशोकौ च कुर्युः॥ इति।

याजुषच्छन्दसां भेदविवेकः

याज्ञिकानां परिभाषणे तानि यजुश्छन्दांस्युच्यन्ते येषु पादनैरपेक्ष्येण अक्षरगणनयैव च्छन्दो निश्चीयते आचार्यैरुपदिश्यते च। यजुर्मन्त्रसम्बन्धिनामेतेषां छन्दसां विवरणं सर्वत्रैव वैदिकच्छन्दोग्रन्थेषु वर्तते। परन्तु सर्वानुक्रमे पद्धतिग्रन्थेषु चैतेषां नामानि विविधरूपाणि दृश्यन्ते। अतोऽस्माभिरत्र प्रत्येकमक्षरसंख्यानुसारस्य छन्दसः कतिविधं नाम भवितुमर्हतीति विवेचनधिया यजुश्छन्दसां शोधात्मकं सङ्कलनमुपस्थाप्यते—

अक्षरसंख्या — छन्दसो विविधसंज्ञाः

१. दैवी गायत्री; दैवी उष्णिक् निचृत्; दैवी अनुष्टुब् विराट्।

२. दैवी उष्णिक्; दैवी अनुष्टुप् निचृत्; दैवी गायत्री भूरिक्; दैवी बृहती विराट्।

३. दैवी अनुष्टुप्; दैवी बृहती निचृत्; दैवी उष्णिक् भूरिक्; दैवी पंक्तिविराट्; दैवी गायत्री स्वराट्।

४. दैवी बृहती; दैवी पंक्तिर्निचृत्; दैवी अनुष्टुप् भूरिक्; दैवी त्रिष्टुप् विराट्; याजुषी गायत्री विराट्, दैवी उष्णिक् स्वराट्।

५. दैवी पंक्तिः; दैवी त्रिष्टुप् निचृत्; याजुषी गायत्री निचृत्; दैवी बृहती भूरिक्; दैवी जगती विराट्; याजुषी उष्णिक् विराट्; दैवी अनुष्टुप् स्वराट्।

६. दैवी त्रिष्टुप्, याजुषी गायत्री, दैवी जगती निचृत्, याजुषी उष्णिक् निचृत्, दैवी पंक्तिर्भूरिक्, प्राजापत्या गायत्री विराट्; याजुषी अनुष्टुप् विराट्, दैवी बृहती स्वराट्।

७. दैवी जगती, याजुषी उष्णिक्, प्राजापत्या गायत्री निचृत्, याजुषी अनुष्टुप् निचृत्, दैवी त्रिष्टुप् भूरिक्, याजुषी गायत्री भूरिक्, आसुरी जगती विराट्, याजुषी बृहती विराट्, दैवी पंक्तिः स्वराट्।

८. प्राजापत्या गायत्री, याजुषी अनुष्टुप्; आसुरी जगती निचृत्; याजुषी बृहती निचृत्; दैवी जगती भूरिक्; याजुषी उष्णिक् भूरिक्, आसुरी त्रिष्टुप् विराट्; याजुषी पंक्तिर्विराट्; दैवी त्रिष्टुप् स्वराट्।

९. आसुरी जगती, याजुषी बृहती; आसुरी त्रिष्टुप् निचृत्, याजुषी पंक्तिर्निचृत्; प्राजापत्या गायत्री भूरिक्; याजुषी अनुष्टुप् भूरिक्; आसुरी पंक्तिर्विराट्; याजुषी त्रिष्टुप् विराट्; दैवी जगती स्वराट्; याजुषी गायत्री स्वराट्।

१०. आसुरी त्रिष्टुप्, याजुषी पंक्तिः; आसुरी पंक्तिर्निचृत्; याजुषी अनुष्टुप् निचृत्; आसुरी जगती भूरिक्; याजुषी बृहती भूरिक्; प्राजापत्योष्णिग्विराट्; आसुरी बृहती विराट्; याजुषी जगती विराट्; साम्नी गायत्री विराट्; प्राजापत्या गायत्री स्वराट्; याजुषी अनुष्टुप् स्वराट्।

११. आसुरी पंक्तिः; याजुषी त्रिष्टुप्; प्राजापत्योष्णिक् निचृत्; आसुरी बृहती निचृत्; याजुषी जगती निचृत्; साम्नी गायत्री निचृत्; आसुरी त्रिष्टुप् भूरिक्; याजुषी पंक्तिर्भूरिक्; आसुरी अनुष्टुप् विराट्; आसुरी जगती विराट्; याजुषी बृहती स्वराट्।

१२. प्राजापत्योष्णिक्; आसुरी बृहती; याजुषी जगती; साम्नी गायत्री; आसुरी अनुष्टप् निचृत्; आसुरी पंक्तिर्भूरिक्, याजुषी त्रिष्टुप् भूरिक्; आसुरी उष्णिग् विराट्; साम्नी उष्णिग्विराट्; आसुरी त्रिष्टुप् विराट्; याजुषी पंक्तिर्विराट्; आसुरी त्रिष्टुप् भूरिक्; याजुषी पंक्तिः स्वराट्।

१३. आसुरी अनुष्टुप्; आसुरी उष्णिक् निचृत्; साम्नी उष्णिक् निचृत्, प्राजापत्योष्णिक् भूरिक्, आसुरी बृहती भूरिक्, याजुषी जगती भूरिक्; साम्नी गायत्री भूरिक्, आसुरी गायत्री विराट्; आसुरी पंक्तिः स्वराट्; याजुषी त्रिष्टुप् स्वराट्।

१४. आसुरी उष्णिक्, साम्नी उष्णिक्, आसुरी गायत्री निचृत्; आसुरी अनुष्टुप् भूरिक्; प्राजापत्यानुष्टुप् विराट्; साम्नी अनुष्टुप् विराट्; प्राजापत्योष्णिक् स्वराट्; आसुरी बृहती स्वराट्; याजुषी जगती स्वराट्; साम्नी गायत्री स्वराट्।

१५. आसुरी गायत्री, प्राजापत्यानुष्टुप् निचृत्, साम्नी अनुष्टुप् निचृत्; आसुरी उष्णिक् भूरिक्; साम्नी उष्णिक् भूरिक्; आसुरी अनुष्टुप् स्वराट्।

१६. प्राजापत्यानुष्टुप्; साम्नी अनुष्टुप्; आसुरी गायत्री भूरिक्; आर्ची गायत्री विराट्; साम्नी बृहती विराट्; आसुरी उष्णिक् स्वराट्; साम्नी उष्णिक् स्वराट् ।

१७. आर्ची गायत्री निचृत्; साम्नी बृहती निचृत्; प्राजापत्यानुष्टुप् भूरिक्; आसुरी गायत्री, गायत्री स्वराट् ।

१८. आर्ची गायत्री, साम्नी बृहती, प्राजापत्या बृहती विराट्, साम्नी पंक्तिः विराट्, प्राजापत्यानुष्टुप् स्वराट्; साम्नी अनुष्टुप् स्वराट् ।

१९. प्राजापत्या बृहती निचृत्; साम्नी पंक्तिनिचृत्; आर्ची गायत्री भूरिक्; साम्नी बृहती भूरिक्; आर्ची उष्णिक् विराट् ।

२०. प्राजापत्या बृहती; साम्नी पंक्तिः; आर्ची उष्णिक् निचृत्; साम्नी त्रिष्टुप् विराट्; आर्ची गायत्री स्वराट्; साम्नी बृहती स्वराट् ।

२१. आर्ची उष्णिक्, साम्नी त्रिष्टुप् निचृत्; प्राजापत्या बृहती भूरिक्; साम्नी पंक्तिर्भूरिक् ।

२२. साम्नी त्रिष्टुप्; आर्ची उष्णिग्भूरिक्; प्राजापत्या पंक्तिर्विराट्; आर्ची गायत्री विराट्; आर्ची अनुष्टुप् विराट्; साम्नी जगती विराट्; प्राजापत्या बृहती स्वराट्; साम्नी पंक्तिः स्वराट् ।

२३. प्राजापत्या पंक्तिर्निचृत्; आर्षी गायत्री निचृत्; आर्ची अनुष्टुप् निचृत्; साम्नी जगती निचृत्; साम्नी त्रिष्टुप् भूरिक्; आर्ची उष्णिक् स्वराट् ।

२४. प्राजापत्या पंक्तिः; आर्षी गायत्री; आर्ची अनुष्टुप्; साम्नी जगती; साम्नी त्रिष्टुप् स्वराट्; [गायत्री]

२५. प्राजापत्या पंक्तिर्भूरिक्; आर्षी गायत्री भूरिक्; आर्ची अनुष्टुब्भूरिक्; साम्नी जगती भूरिक्; आर्ची बृहती विराट् ।

२६. आर्ची बृहती निचृत्; प्राजापत्या त्रिष्टुप् विराट्, आर्षी उष्णिक् विराट् प्राजापत्या पंक्तिः स्वराट्; आर्षी गायत्री स्वराट्, आर्ची अनुष्टुप् स्वराट् साम्नी जगती स्वराट् ।

२७. आर्ची बृहती; प्राजापत्या त्रिष्टुप् निचृत्; आर्ची उष्णिक् निचृत् ।

२८. प्राजापत्या त्रिष्टुप्; आर्षी उष्णिक्; आर्ची बृहती भूरिक्; आर्ची पंक्तिर्विराट्; [उष्णिक्]; (ककुप्)

२९. आर्ची पंक्तिर्निचृत्; प्राजापत्या त्रिष्टुप् भूरिक्; आर्षी उष्णिग्भूरिक्; आर्ची बृहती स्वराट् ।

३०. आर्ची पंक्तिः, प्राजापत्या जगती विराट्, आर्षी अनुष्टुप् विराट्; प्राजापत्या त्रिष्टुप् विराट्; आर्षी उष्णिक् स्वराट्, ऋचां पंक्तिः (मा० सर्वा० २३।१९ देवः)

३१. प्राजापत्या जगती निचृत्; आर्षी अनुष्टुप् निचृत्; आर्ची पंक्तिर्भूरिक्; आर्ची त्रिष्टुप् विराट् ।

३२. प्राजापत्या जगती; आर्षी अनुष्टुप्; आर्ची त्रिष्टुप् निचृत्; आर्ची पंक्तिः स्वराट्; [अनुष्टुप्]

३३. आर्ची त्रिष्टुप्; प्राजापत्या जगती भूरिक्; आर्षी अनुष्टुप् भूरिक् ।

३४. आर्ची त्रिष्टुप् भूरिक्; आर्षी बृहती विराट्; आर्ची जगती विराट्; ब्राह्मी गायत्री विराट्; प्राजापत्या जगती स्वराट; आर्षी अनुष्टुप् स्वराट् ।

३५. आर्षी बृहती निचृत्; आर्ची जगती निचृत्; ब्राह्मी गायत्री निचृत्; आर्ची त्रिष्टुप् स्वराट् ।

३६. आर्षी बृहती; आर्ची जगती; ब्राह्मी गायत्री; [बृहती]; (सतोबृहती)

३७. आर्षी बृहती भूरिक्; आर्ची जगती भूरिक्, ब्राह्मी गायत्री भूरिक् ।

३८. आर्षी पंक्तिर्विराट्; आर्षी बृहती स्वराट्; आर्ची जगती स्वराट्; ब्राह्मी गायत्री स्वराट् ।

३९. आर्षी पंक्तिर्निचृत् ।

४०. आर्षी पंक्तिः, ब्राह्मी उष्णिक् विराट्, [पंक्तिः]; (तन्द्रच्छन्दः मा० सं० १४।९ श० ब्रा० ८।२।४।३)

४१. ब्राह्मी उष्णिक् निचृत्; आर्षी पंक्तिर्भूरिक् ।

४२. ब्राह्मी उष्णिक्; आर्षी त्रिष्टुप् विराट्; आर्षी पंक्तिः स्वराट् ।

४३. आर्षी त्रिष्टुप् निचृत्; ब्राह्मी उष्णिक् भूरिक् ।

४४. आर्षी त्रिष्टुप्, ब्राह्मी उष्णिक् स्वराट्, [त्रिष्टुप्]

४५. आर्षी त्रिष्टुप् भूरिक् ।

४६. आर्षी जगती विराट्, ब्राह्मी अनुष्टुप् विराट्, जगती विराट्, आर्षी त्रिष्टुप् स्वराट् ।

४७. आर्षी जगती निचृत्, ब्राह्मी अनुष्टुप् निचृत्, जगती निचृत् ।

४८. आर्षी जगती, ब्राह्मी अनुष्टुप्; [जगती] (अतिच्छन्दाः)

४९. आर्षी जगती भूरिक्, ब्राह्म्यनुष्टुप्भूरिक्, जगती भूरिक् ।

५०. अतिजगती विराट्; आर्षी जगती स्वराट्, ब्राह्म्यनुष्टुप् स्वराट्; जगती स्वराट् ।

५१. अतिजगती निचृत् ।

५२. अतिजगती, ब्राह्मी बृहती विराट् ।

५३. ब्राह्मी बृहती निचृत्; अतिजगती भूरिक् ।

५४. ब्राह्मी बृहती; शक्वरी विराट्, अतिजगती स्वराट् ।

५५. शक्वरी निचृत्; ब्राह्मी बृहती भूरिक् ।

५६. शक्वरी; ब्राह्मी बृहती स्वराट्; (महानाम्न्यो रेवत्यः मा०सं०२३।२५) ।

५७. शक्वरी भूरिक् ।

५८. ब्राह्मी पंक्तिर्विराट्, अतिशक्वरी विराट्, शक्वरी स्वराट् ।

५९. ब्राह्मी पंक्तिर्निचृत्, अतिशक्वरी निचृत् ।

६०. ब्राह्मी पंक्तिः; अतिशक्वरी ।

६१. ब्राह्मी पंक्तिर्भूरिक्; अतिशक्वरी भूरिक् ।

६२. अष्टिर्विराट्, ब्राह्मी पंक्तिः स्वराट्, अतिशक्वरी स्वराट् ।

६३. अष्टिर्निचृत् ।

६४. अष्टिः, ब्राह्मी त्रिष्टुप् विराट् ।

६५. ब्राह्मी त्रिष्टुप् निचृत्; अष्टिर्भूरिक् ।

६६. ब्राह्मी त्रिष्टुप्, अत्यष्टिर्विराट्, अष्टिः स्वराट् ।

६७. अत्यष्टिर्निचृत्; ब्राह्मी त्रिष्टुप् भूरिक् ।

६८. अत्यष्टिः, ब्राह्मी त्रिष्टुप् स्वराट् ।

६९. अत्यष्टिर्भूरिक् ।

७०. ब्राह्मी जगती विराट्; धृतिर्विराट्; अत्यष्टिः स्वराट् ।

७१. ब्राह्मी जगती निचृत्, धृतिर्निचृत् ।

७२. ब्राह्मी जगती; धृतिः ।

७३. ब्राह्मी जगती भूरिक्; धृतिर्भूरिक् ।

७४. अतिधृतिर्विराट्; ब्राह्मी जगती स्वराट्, धृतिः स्वराट् ।

७५. अतिधृतिर्निचृत् ।

७६. अतिधृतिः ।

७७. अतिधृतिर्भूरिक् ।

७८. कृतिर्विराट्; अतिधृतिः स्वराट् ।

७९. कृतिर्निचृत् ।

८०. कृतिः ।

८१. कृतिर्भूरिक् ।

८२. प्रकृतिर्विराट्; कृतिः स्वराट् ।

८३. प्रकृतिर्निचृत् ।

८४. प्रकृतिः ।

८५. प्रकृतिर्भूरिक् ।

८६. आकृतिर्विराट्; प्रकृतिः स्वराट् ।

८७. आकृतिर्निचृत् ।

८८. आकृतिः ।

८९. आकृतिर्भूरिक् ।

९०. स्वराडाकृतिः, विकृतिर्विराट् ।

९१. निचृद्विकृतिः ।

९२. विकृतिः ।

९३. भूरिग् विकृतिः ।

९४. संकृतिर्विराट्; विकृतिः स्वराट् ।

९५. निचृत् संकृतिः ।

९६. संकृतिः ।

९७. संकृतिर्भूरिक् ।

९८. विराडभिकृतिः; स्वराट् संकृतिः ।

९९. निचृदभिकृतिः ।
१००. अभिकृतिः ।
१०१. भूरिगभिकृतिः ।
१०२. उत्कृतिर्विराट्; स्वराडभिकृतिः ।
१०३. उत्कृतिर्निचृत् ।
१०४. उत्कृतिः ।
१०५. भूरिगुत्कृतिः ।
१०६. उत्कृतिः स्वराट् ।
१०. विच्छन्दाः (द्र० मा० सं० २३।३४) ।

षड्गुरुशिष्य-देवयाज्ञिक-भाष्यद्वयसंवलितानि

कात्यायनीयछन्दःसूत्राणि

सम्पादकः
श्रीकिशोरमिश्रः

षड्गुरुशिष्य-देवयाज्ञिक-भाष्यद्वयसंवलितानि

कात्यायनीयछन्दःसूत्राणि

प्रथमः परिभाषाखण्डः

[प्रतिज्ञा]

अथ छन्दांसि[1] ॥१।१॥

ष० अथेति प्रस्तावे। अनन्तरं छन्दांसि प्रस्तूयन्त इत्यर्थः। अथैतेषां छन्दसामेव चतुर्दश नामान्याह—

दे० अभिधीयन्त इति शेषः। अथानन्तरं छन्दांस्यभिधीयन्ते। अथ तेषां छन्दसां नामान्याह—

[यजुश्छन्दोनामानि]

गायत्र्यु-ष्णिग-नुष्टुब्-बृहती-पङ्क्ति - त्रिष्टुब्-जगत्यो - sति-जगती-शक्वर्य-तिशक्वर्य-ष्टय-त्यष्टि-धृत्य-तिधृतयः कृति-प्रकृत्या-कृति-विकृति-सङ्कृत्य-भिकृत्यु-त्कृतयः ॥१।२॥

---

१. एतानि 'अथ छन्दांसी'—त्यादिकानि छन्दःसूत्राणि ऋग्वेदानुक्रमणिकासम्बन्धीनि। तानि चोपयोगित्वाद् यजुर्वेदिभिरपि शुक्लयजुर्वेदानुक्रमणिकायाः पञ्चमाध्यायत्वेन स्वीकृतानि। तेनात्र प्रतिपादितानां गायत्र्यादिभेदानां सर्वेषां मध्ये कानि चिदुदाहरणान्यस्यां वाजसनेयसंहितायां न सन्ति। 'तस्मादेतन्नाब्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय नाप्रवक्त्रेऽनुब्रूयात्' (शु० य० सर्वा० ४ अ०) इत्यादिफलप्रदर्शनं शुक्लयजुःसर्वानुक्रमग्रन्थसमाप्तिचिह्नं चतुर्थाध्यायान्त एव दृश्यते। अतः कात्यायनानुयायिभिरुपयोगित्वात्पञ्चमाध्यायत्वेन समादृतानि। ऋक्सर्वानुक्रमण्यां अपि कात्यायनप्रणीतत्वात् कात्यायनीयत्वं चैतेषामस्त्येव। कात्यायनीया ऋक्सर्वानुक्रमणी पाश्चात्यमतानुसारेण विक्रमात् ३०० संवत्सरपूर्वा वर्तते। अस्मन्मते तु ततोऽप्यधिकपूर्वा रचनेति।

(द्र० वै० वा० इ० १।९)

ष० एषां गायत्र्यादीनां शब्दानामितरेतरयोगे द्वन्द्वः। संज्ञाप्रदेशाः प्रथमं छन्दस्त्रिपदा गायत्रीत्येवमादयः। अथ तेषामेवाक्षरसंख्यामाह—

दे० गायत्र्यादय उत्कृतिपर्यन्ता एकविंशतिशब्दाश्छन्दसां संज्ञाः। संज्ञाकरणं 'समिधाग्नेऽग्नयश्चतस्रो गायत्र्य' इत्यादौ[1] संव्यवहारार्थम्।

अथैतेषामेव छन्दसामक्षरसंख्यामाह—

[यजुश्छन्दसामक्षरसंख्या]

चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि ॥१।३॥

ष० चतुर्विंशत्यादिचतुरुत्तरवृद्धया षट्सप्तत्यन्तानि च्छन्दांसि भवन्ति। चतुर्विंशतिर्गायत्री। अष्टाविंशतिरुष्णिक्। द्वात्रिंशदनुष्टुप्। षट्त्रिंशदक्षरा बृहती। चत्वारिंशदक्षरा पंक्तिः। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्। अष्टाचत्वारिंशदक्षरा जगती। द्वापञ्चाशदक्षरातिजगती। षट्पञ्चाशच्छक्वरी। षष्टिरतिशक्वरी। चतुःषष्टिरष्टिः। अष्टाषष्टिरत्यष्टिः। द्वासप्ततिर्धृतिः। षट्सप्ततिरतिधृतिरित्यर्थः। अत्र विशेषमाह—

दे० एतानि गायत्र्यादीन्युत्कृतिपर्यन्तानि एकविंशतिसंख्यानि छन्दांसि चतुर्विंशत्यक्षरादीनि=चतुर्विंशत्यक्षरात्मकं गायत्रीसंज्ञं छन्द उपक्रम्य चतुरुत्तराणि भवन्ति। पूर्वपूर्वछन्दोऽपेक्षया उत्तरमुत्तरं छन्दश्चतुर्भिश्चतुर्भिरक्षरैरधिकं भवतीत्यर्थः। तथाहि—गायत्री चतुर्विंशत्यक्षरा। तदपेक्षया चतुर्भिरक्षरैरधिकोष्णिगष्टाविंशत्यक्षरा। उष्णिगपेक्षयानुष्टुप् चतुर्भिरक्षरैरधिका द्वात्रिंशदक्षरा। अनुष्टुबपेक्षया चतुर्भिरक्षरैरधिका बृहती षट्त्रिंशदक्षरा। एवमेव प्रतिच्छन्दः पूर्वपूर्वापेक्षया चतुरक्षरवृद्धिर्ज्ञेया। चत्वारिंशदक्षरा पङ्क्तिः। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्। अष्टाचत्वारिंशदक्षरा जगती। द्वापञ्चाशदक्षरातिजगती। षट्पञ्चाशदक्षरा शक्वरी। षष्टयक्षरातिशक्वरी। चतुःषष्टयक्षरा अष्टिः। अष्टषष्टयक्षरा अत्यष्टिः। द्वासप्तत्यक्षरा धृतिः। षट्सप्तत्यक्षरा अतिधृतिः। अशीत्यक्षरा कृतिः। चतुरशीत्यक्षरा प्रकृतिः। अष्टाशीत्यक्षरा आकृतिः। द्वानवत्यक्षरा विकृतिः।

१. शु० य० सर्वा० पृ० ४४ मा० सं० ३।१

षण्णवत्यक्षरा सङ्कृतिः। शताक्षरा अभिकृतिः। चतुरधिकशताक्षरोत्कृतिरिति। एतेषामुदाहरणानि प्रागेव[1] दर्शितानि।

[अक्षरगणनापरिभाषा]

ऊनाधिकेनैकेन निचृद्-भुरिजौ ॥१।४॥

ष० एकेनाक्षरेणोनेनैषामेव निचृद्गायत्री निचृदुष्णिक् निचृत्पदपंक्तिर्निचृत्ककुम्न्यंकुशिरा निचृज्जगतीत्यादिसर्वसंज्ञाः स्युः। तथाधिकेनैकेन भुरिग्गायत्रीत्यर्थः। त्रयोविंशतिर्निचृद्गायत्री पञ्चविंशतिर्भुरिग्गायत्रीत्यादि। यथा—अग्निं पूर्वेभिर्ऋषिभिरिति निचृद्गायत्री। विद्वाँसा विदुरः पृच्छेदिति भुरिग्गायत्री।

दे० पूर्वोक्तानां नियताक्षराणां गायत्र्यादीनामुत्कृतिपर्यन्तानां छन्दसामेकेनाक्षरेणोनेन न्यूनेनैकेनाधिकेनातिरिक्तेन यथाक्रमं निचृद्भुरिगित्येते संज्ञे भवतः। तद्यथा—गायत्री चतुर्विंशत्यक्षरा, सैकेनाक्षरेणोना त्रयोविंशत्यक्षरा निचृदित्युच्यते। सैवैकाधिका पञ्चविंशत्यक्षरा भुरिगित्युच्यते। एवमनुष्टुबाद्युत्कृतिपर्यन्तानां ज्ञेयम्।

द्वाभ्यां विराट्-स्वराजौ ॥ १।५ ॥

ष० ऊनाधिकेत्येव। द्वाभ्यामक्षराभ्यामूनाभ्यां विराड्गायत्रीत्यादिसर्वसंज्ञाः स्युः। तथा द्वाभ्यामधिकाभ्यां स्वराड्गायत्रीत्यादीत्यर्थः। द्वाविंशतिर्विराड्गायत्री। षड्विंशतिः स्वराड्गायत्री विराडुष्णिग्वा। यथा राजन्तमध्वराणाम् इति विराड्गायत्री। इन्द्र जुषस्व प्रवहायाहोति स्वराडनुष्टुप् सूत्रपठिता। अत्र शास्त्रे निचृदादिविशेषणचतुष्टयस्य क्वचिदप्यनुक्तिर्लाघवार्था। इतरथेदमिदमिति प्रतिपंक्त्युक्तौ बहुवक्तव्यतया शास्त्रं गुरुतरं स्यात्। न खल्वेतद्विशेषणचतुष्टयास्पृष्टं किंचिदपि सूक्तं प्रायेण विद्यते। तथाप्यस्माकमेतच्चतुष्टयं सामान्योक्तावपि सति न्यूनाधिकाभावेऽवश्यं ज्ञातव्यमेवातो योगद्वयादुपदेशेषु क्वचित्कथंचिदुपलम्भाच्च। तथा हि छन्दोऽनु-

१. तत्तत्स्थलेषु सर्वानुक्रमसूत्रव्याख्यावसरे। द्वितीयतृतीयसूत्रे यजुषि छन्दोबोधकेस्तः। यजुर्नाम अनियताक्षरपादावसानको वैदिको मन्त्राः। यजुषां विशेषेण समुपलम्भात् आध्वर्यववेदस्य यजुर्वेदशब्दव्यवहारः प्रायिकदृष्ट्या वर्तते। अत एव यजुर्वेदे ऋचाम्, ऋक्सामाथर्ववेदेषु च यजुषामपि उपलब्धिर्भवत्येव।

क्रमण्यां—हिरण्यपाणिः सविता विचर्षणिरितीयमुत्तरस्य सूक्तस्य नवमी जगती निचृदित्युच्यते। तथा हि प्रतिशाख्ये—

ददी रेवण इति त्वेषा ककुम्न्यंकुशिरा निचृत् ॥
त्रयो द्वादशका यस्याः सा होष्वंबृहती विराट्।
महो यो अधौन्न तं मत्सीजानभिदंजोजनः ॥

इति च। अथोनाक्षरेषु गायत्र्यादिव्यवहारसिद्धये पादनिर्वाहप्रकारमाह—

दे० सर्वेषां छन्दसां द्वाभ्यामक्षराभ्यां न्यूनाभ्यां 'विराट्' संज्ञा भवति। द्वाभ्यामक्षराभ्यामधिकाभ्यां 'स्वराट्' संज्ञा भवति। अत्रोनाधिकेने-(१।४) त्यनुवर्तते, तदूनाधिकाभ्यामिति विपरिणम्य द्वाभ्यामित्येनेन सम्बन्ध्यते। तद्यथा—द्वात्रिंशत्यक्षरा गायत्री विराट्। षड्विंशत्यक्षरा स्वराट्। षड्विंशत्यक्षरा विराडुष्णिक्। त्रिंशदक्षरा स्वराडुष्णिगिति। एवं त्रिंशदक्षरा विराडनुष्टुप्। चतुस्त्रिंशदक्षरा स्वराट्। एवमुत्कृतिपर्यन्तेष्वह्यम्। अत्र शास्त्रे[1] निचृदादिसंज्ञाचतुष्टयस्य क्वचिदप्यनुक्तिर्लाघवार्था। अन्यथा सर्वत्र न्यूनाधिकाक्षरत्वस्य विद्यमानत्वेन निचृदादिसंज्ञोपबन्धे सति शास्त्रं गुरुतरं स्यादतः स्वयमेवोहित्वा यथासम्भवमेतत्संज्ञाचतुष्टयं ज्ञेयम्।

अथ न्यूनाक्षरेष्वक्षरपूरणोपायमाह—

पादपूरणार्थं तु क्षैप्र-संयोगै-काक्षरीभावान् व्यूहेत् ॥१।६॥

ष० क्षैप्रसंयोगो यकारवकारसंयोगः। यण्संयोग इत्यन्ये। कुत एतत्? यण् हि क्षिप्रे भवति। क्षैप्रो दध्यत्रेत्यादावेकमात्रामर्धमात्रां करोतीति। एकः पूर्वपरयोरित्यधिकारे सम्पन्नः सन्धिरेकाक्षरीभावः। तत्र पूर्वं द्वे अक्षरे एकमक्षरं क्रियत इति। एतान्पादपूरणार्थं व्यूहेत् पृथक्कुर्यात्। यकारं व्यूहेत्—दिवस्पृथिव्याः पर्योज उद्भृतं प्रत्नो होता वरेण्यः, तत्सवितुर्वरेण्यम्, इत्यादौ। वकारं व्यूहेत्—द्रवन्नः सर्पिरासुतिर्दिवं गच्छ स्वःपत इत्यादौ। रेफं व्यूहेत्-एवा त्वामिन्द्र वज्रिन्नत्र। आद्गुणं व्यूहेत्—उपेदमुपपर्चनम इन्द्रो ब्रह्मेन्द्र ऋषिः। एवं वृद्धिं व्यूहेत्-प्र ब्रह्मैतिवित। एङः पदान्तादतीति पूर्वरूपं व्यूहेत्—अयासा मनसा कृसोऽयासं हव्यमूहिषेऽया नो धेहि भेषजम, इन्द्र वाजेषु नोऽव इन्द्रं स्वायोऽनु सं रभध्वमिति च। सवर्णदीर्घं

१. शास्त्रे सर्वानुक्रमणीग्रन्थे।

व्यूहेत्—वदन ब्रह्मावदतो वनीयान् अज्रायां शः श्र इति च॥ आद्गुणं व्यूहेदित्याद्येकाक्षरीभावस्योदाहरणम्।

वे० न्यूनाक्षरेषु पादेषु पादपूरणार्थं क्षैप्रसंयोगानेकाक्षरीभावांश्च व्यूहेत्। क्षिप्रे संहितायां, भवः सन्धिः क्षैप्रः। क्षैप्रः संयोगो यकारवकारसंयोगः। यण्संयोग इत्यपरे[1]। तदुक्तम्[2]—

समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम्।
न समानाक्षरे स्वे स्वे ते क्षैप्राः प्राकृतोदयाः॥ इति।

ते सन्धयः क्षैप्रा इत्यर्थः।

'एकः[3] पूर्वपरयोः' इत्यस्मिन्नधिकारे यः सन्धिः 'आद् गुणः[4]' 'वृद्धिरेचि[5]' इत्यादिभिर्द्वयोरचोः स्थाने य एकादेशः स एकाक्षरीभावः। अनेकाक्षरस्यैकाक्षरभाव एकाक्षरीभावः। एतान् पादपूरणार्थं व्यूहेत् पृथक्कुर्यात्।

तदुक्तम्[6]—व्यूहेदेकाक्षरीभावान्पादेषूनेषु सम्पदे।

ऊनेषु पादेषु सम्पदे सम्पदर्थम् एकाक्षरीभावान् सन्धीन् व्यूहेत् पृथक्कुर्यादित्यर्थः। तथा[7]—'क्षैप्रवर्णाश्च संयोगान्व्यवेयात्सदृशैः स्वरैः' इति।

अस्यार्थः—क्षैप्रवर्णान् संयोगान् अन्तस्थासंयोगानित्यर्थः, व्यवेयात् व्यवधानं कुर्यात्। कैः? सदृशैः समानस्थानैर्वर्णैः। तद्यथा—त्रियम्बकं यजामहे[8]। तत्सवितुर्वरेणियमिति[9]। अत्र यकारस्य समानस्थानेनेकारेण व्यवायेन पादपूरणम्।

१. एतन्मते रेफ-लकारयोरपि व्यूहः।
२. ऋ. प्रा. २।२१-२३। अयमर्थः—अकण्ठ्यं = कण्ठस्थानीयमवर्णं विना, समानाक्षरं = समानाक्षरसंज्ञितं वर्णजातम्, इ-उ-ऋवर्णात्मकं, स्वरोदयम् = अजक्षरपरं भवति चेत् स्वां = स्थानसादृश्येन स्वत्वेन भावितां, अन्तस्थाम् = सरलव्यञ्जनरूपामापद्यते। अयमुत्सर्गः। एतस्यापवादमाह—स्वे स्वे समानाक्षरे = स्वसमानजातीयके इ-उ-ऋवर्णे परे पूर्वोक्तः अन्तस्थापादकः सन्धिर्न भवति। ते = सन्धयः, क्षैप्राः = क्षैप्रसंज्ञकाः, प्राकृतोदयाः = प्राकृतम् अविकृतम् उदयं परमक्षरं येषु ते। पराक्षरस्य अविकारोत्पादका इमे क्षैप्रसन्धयः। ततश्च पूर्वाक्षरस्यैव अन्तस्थाविकारो न पूर्वपरयोरिति।
३. पा. ६।१।८४
४. पा. ६।१।८७
५. पा. ६।१।८८
६. ऋ. प्रा. १७।२२
७. ऋ. प्रा. १७।२३
८. मा. सं. ३।६०
९. मा. सं. ३।३५

तथा-द्रुवं नः सर्पिरासुतिरिति[1] । सुवर्षामप्सां वृजनस्य गोषामिति[2] । अत्र वकारस्य समानस्थानेनोकारेण व्यवायः ।

पिङ्गलोऽपि—'पादः, इयादिपूरणः' इति[3] यकारस्य समानस्थानेनेकारेण व्यवायमाह । आदिशब्देनोवादि गृह्यते । क्वचिद्रेफमपि व्यूहेत् । अयं समानस्थानैः स्वरैर्व्यवायः स्वाभाविकेष्वेव यकारवकारसंयोगेषु भवति । यथा-समश्वपर्णाश्चरन्ति नो नर[4] इति । यणादेशेन कृतेषु यकारवकारसंयोगेषु तु-अप्सु अन्तरमृतमिति[5], वामं प्रयति अध्वर[6] इत्येव पदप्रकृत्या व्यूहः कर्त्तव्यः । यकारवकारसंयोग[7] एवायं व्यवाय इष्यते रेफलकारसंयोगयोस्तु नेष्यत इति प्रातिशाख्यभाष्ये[8], गायत्रविधाने ।

प्राकृतसन्ध्ययोः सन्देहे सन्ध्यो विकृष्यः, सदृशयोस्तु परो विकृष्य इति ।

यत्र तु द्वित्र्यादिव्यूहस्थानानि तत्र पूर्वव्यूहेनैव पादपूरणे सिद्धे द्वितीयादौ न व्यूहेत् ।

अथैकाक्षरीभावव्यूहोदाहरणानि-प्रइता जयता नर, इत्यत्र 'आदृगुणः' इत्येकादेशस्य गुणस्य व्यूहेन पूरणम् । 'प्र ऐतु ब्रह्मणस्पतिः' इत्यत्र 'एत्येधत्यूठ्सु' इति वृद्धेरेकादेशस्य व्यूहः । 'परि मा अग्ने दुश्चरितात्' इत्यत्र 'अकः सवर्णे दीर्घः' इत्यनेन कृतस्यैकादेशस्य दीर्घस्य व्यूहः । 'अधिब्रवन्तु ते अवन्त्वस्मान्' इत्यत्र 'एङः पदान्तात्' इति एकादेशस्य पूर्वरूपस्य व्यूहः ।

छन्दोगपरिशिष्टेऽपि—'सर्वछन्दःस्वेकेन पञ्चाक्षरेण शङ्कुमती भवति, अथैकाक्षरहीना निचृदेकाधिका भूरिक्, द्व्यूना विराट्, द्व्यधिका स्वराट् अल्पीयोमध्या त्रिपात्पिपीलिकमध्या भूयोमध्या यवमध्येति । यवाभ्यां यकारवकारविकर्षण न्यूनानि छन्दांसि पूरयेन्नांशब्देन च मदश्चवर्जम् । पदप्रकृत्या च । त्वशब्देन न्यूनत्वे तु शब्दपूरण' इति ।

तदेवं यत्र व्यूहः सम्भवति तत्र व्यूहेन पूरणम् । यत्र तु व्यूहेनापि न पूर्यन्ते तत्र निचृद्भुरिग्विराट्स्वराडादिसंज्ञा ।

१. मा. सं. ११।७० २. मा. सं. ३४।२०
३. पि. छ. ३।१-२ ४. मा. सं. २९।५७ ५. मा. सं. ९।६
६. मा. सं. ४।५ ७. साहजिके, अन्तःपदसन्धौ वा
८. द्र. ऋ. प्रा. भाष्ये १७।२३ उव्वटः । 'गायत्रविधाने' इति गायत्रीप्रकरणनिर्देशः ।

यत्र तु सन्देहो जायते तथा क्वचिदष्टात्रिंशदक्षराणि भवन्ति । तत्र किमियं बृहती वा द्व्यधिका, अथवा पङ्क्तिर्द्व्यूनेति । तत्र विकल्पो बृहती वा पङ्क्तिर्वेति । तथा च सूत्रकारः—ऋतवो बृहती पङ्क्तिर्वा, उपज्मन् जगती त्रिष्टुब्वा । चतुस्त्रिंशद्धर्मदेवत्या पङ्क्तिस्त्रिष्टुब्वेति । एवं पिङ्गलोक्तेष्वपि छन्दःसूत्कृतिपर्यन्तेषु सन्देहे विकल्पो द्रष्टव्यः । अधिकाक्षरं पूर्वं छन्दो न्यूनाक्षरञ्चोत्तरमिति । तथा—

अक्षराण्येव सर्वत्र निमित्तं बलवत्तरम् ।
विद्याद्विप्रतिपन्नानां पादवृत्ताक्षरैर्ऋचाम्[1] ॥ इति ॥

अस्यार्थः—पादैर्वृत्तैरक्षरैश्च विप्रतिपन्नानामृचां सर्वत्र बलवत्तरं निमित्तमक्षराण्येव विद्यात्[2] । यथा 'मीढुष्टम' इति पादैर्विप्रतिपन्ना अक्षरैस्त्रिष्टुबध्यवसीयते । यथा 'एषा ते अग्ने समित्' इति वृत्तेन विप्रतिपन्नाक्षरैरनुष्टुबध्यवसीयते ।

यदा काचित् षड्विंशत्यक्षरा ऋग्भवति । तत्र सन्देहः, किमियं स्वराट् गायत्री उत विराडुष्णिगिति । एवं सर्वछन्दःसु संशय ऊह्यः । तदा निर्णयोपायमाह पिङ्गलः—

आदितः सन्दिग्धे ।

सन्दिग्धे छन्दस्यादितः प्रथमपादा छन्दो निश्चेतव्यम् । यदा प्रथमः पादोऽष्टाक्षरस्तदा सा गायत्री । यदा द्वादशस्तदोष्णिगिति । एवं सर्वेषु । तथा—

देवतादितः ।

सन्दिग्धं छन्दो देवतादिभिर्निश्चेतव्यम् । तद्यथा—यदा सन्दिग्धे छन्दस्यग्निर्देवता भवति तदा सा गायत्री । यदा सविता तदोष्णिक् । यदा सोमस्तदानुष्टुबित्यादि ।

[ऋक्छन्दःपरिभाषा]

आद्ये तु सप्तवर्गे पादविशेषात् संज्ञाविशेषः ॥१।७॥

ष० तुशब्दोऽवधारणे । चतुर्दशसु च्छन्दःस्वाद्ये तु सप्तवर्गे गायत्र्यादिजगत्यन्त एव पादविशेषात्संज्ञाविशेषा भवन्ति, नोत्तरसप्तकेऽतिजगत्यादिति-

१. ऋ. प्रा. १७।२१
२. 'पादै'.....विद्यात्'—पाठोऽयमृक्प्रातिशाख्यभाष्येण (उव्वटेन) संवदति ।

ध्यन्ते। आद्ये सप्तके पादविशेषात्संज्ञाभेदा ऋष इति पुनर्वेदनीयमित्याह।

दे० तुशब्दोऽवधारणे। गायत्र्यादीनामेकविंशतिसंख्यानां छन्दसां त्रयः सप्तवर्गाः। तेषां त्रयाणां सप्तवर्गाणां मध्ये आद्य एव सप्तवर्गे गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतेषां सप्तानां छन्दसां वर्गे समूहे पादविशेषात् पादानां चतुरक्षरपञ्चाक्षरषडक्षरसप्ताक्षराष्टाक्षरनवाक्षरत्वादिरूपविशेषात् सज्ञाविशेषाः पदपङ्क्त्यादयो भवन्ति न द्वितीयतृतीयसप्तवर्गयोः।

ताननुक्रामन्त एवोदाहरिष्यामः ॥१।८॥

ष० तान्पादकृतसंज्ञाविशेषानेवानुक्रामन्तोऽग्निं नव मधुच्छंदा वैश्वामित्रो वायो वायव्यमित्यादिप्रतिसूक्तमृष्यादिपरिपाटीं वदन्त उदाहरिष्यामः। न पुनः सामान्यगायत्र्यादिशब्दान्।

दे० तान् प्रकृतसंज्ञाविशेषाननुक्रामन्त एव ऋष्याद्यनुक्रमणं कुर्वन्त एवोदाहरिष्यामः। पदपाङ्क्तो नवमः। अन्त्या तु पादनिचृत्। उपरिष्टाज्ज्योतिः षष्टीत्येवम्।

विराड्रूपा विराट्स्थानाश्च बहूना अपि[1] त्रिष्टुभ एव ॥१।९॥

ष० त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वे प्राप्ते सति बहुभिरक्षरैरूना हीना अपि विराड्रूपा विराट्स्थानाश्च त्रिष्टुबधिकारोक्तास्त्रिष्टुभ एव स्युः। नवको वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानैकादशिनस्त्रयोऽष्टकश्च विराड्रूपेति चैकोनचत्वारिंशच्चत्वारिंशदेकचत्वारिंशदिति पञ्चभिश्चतुर्भिस्त्रिभिरक्षरैरूना अप्यधिकारात्त्रिष्टुभ एवेत्यर्थः। किमर्थमिदमुच्यते ? असत्यस्मिन्योगे ह्येकोनचत्वारिंशतो निचृत्पंक्तित्वं, चत्वारिंशतः पंक्तित्वम्, एकचत्वारिंशतो भुरिक्पंक्तित्वं च स्यात्।

दे० नवको वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानेति, एकादशिनस्त्रयोऽष्टकश्च विराड्रूपेति च वक्ष्यति। तत्रेदमुच्यते त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वाद्विराड्रूपाया एकचत्वारिंशदक्षरत्वाद्विराट्स्थानायाश्चैकोनचत्वारिंशदक्षरत्वाच्चत्वारिंशदक्षरत्वाद्वा त्रिष्टुप्त्वं न भविष्यतीति शङ्कायामाह। विराड्रूपा विराट्स्थानाश्च ऋचो बहूना अपि बहुभिरक्षरैरूना अपि त्रिष्टुभ एव। ऊनाक्षरत्वात्त्रिष्टुभो न भवन्तीति शङ्का

१. 'बहूनामपि' पाठः

न कार्येत्यर्थः। किं च स्यात्। एकोनचत्वारिंशदक्षरायाः निचृत्पङ्क्तित्वं चत्वारिंशदक्षरायाः पङ्क्तित्वमेकचत्वारिंशदक्षरायाः भुरिक्पङ्क्तित्वं स्यात्, तन्मा भूदित्येवमर्थमस्यारम्भः।

इत्युद्देशः ॥१।१०॥

ष० इतिशब्दः प्रकारे। उद्देशः संक्षेपः। पूर्वोक्तप्रकारो बहूनेषु तत्तदधिकारात्तदात्मकः सप्तच्छन्दःसु गायत्र्यादिष्वभिमत इत्यर्थः। तेन त्रयः सप्तकाः पादनिचृदित्येकविंशत्यक्षरापि गायत्र्येव मध्यमः षट्कश्चेदतिनिचृदिति च विंशत्यक्षरापि गायत्र्येवेत्यादि सिद्धं भवति। न वा एकेनाक्षरेण च्छन्दांसि वियन्ति न द्वाभ्यामिति। न ह्येकस्मादक्षराद्बाधयन्तीति च। तत्र वियन्तीत्यन्यत्वं गच्छन्तीत्यर्थः। बाधयन्तीति नश्यन्तीत्यर्थः। द्व्येकयोरुपलक्षणत्वाद् बहूनेष्वपि भवति। तत्राद्यसप्तके गायत्र्यादिजगत्यन्ते वक्ष्यमाणे वेदितव्यम्। अस्य चानन्तरसूत्रे प्रयोजनाभावादनादेशेऽष्टाक्षरा इत्यादिपूर्वसप्तक एव नोत्तरसप्तक इति वक्तुं तत्रोपयोगः। तेनातिजगत्याद्यतिधृत्यन्ते यथाध्ययनं पादाक्षरसंख्याव्यवस्थेति सिद्धम्। व्यवहारलाघवाय संज्ञाः करोति।

दे० इतिशब्दः प्रकारे। इति अनेन प्रकारेण सर्वछन्दःसमुद्देशः। एकद्विबह्वक्षरैरूनानामपि स्वस्वनाम्नैव सङ्कीर्तनम्। सैव संज्ञा ज्ञेयेत्यर्थः। उद्दिश्यतेऽभिधीयतेऽनेनेत्युद्देशः संज्ञा। यथा विराड्पादीनां न्यूनाक्षराणामपि त्रिष्टुप्त्वमेव। एवमितरेषामपि छन्दसां न्यूनाधिकत्वेऽपि तत्तच्छन्दस्त्वमेव भवति। न चाक्षरेण च्छन्दांसि वियन्ती न द्वाभ्यामिति श्रुतेः। तस्मान्नाक्षराच्छन्दो व्येत्येकस्मान्न द्वाभ्यामिति श्रुतेश्च। यथा त्रयः सप्तकाः पादा निचृदिति त्रिभिरूनापि गायत्र्येव।

[संख्यानिर्देशपरिभाषा]

तत्र दशै—कादश—द्वादशाक्षराणां वैराज—त्रैष्टुभ—जागता इति संज्ञाः ॥१।११॥

ष० पादानामिति शेषः। अक्षरशब्दस्य प्रत्येकं संबन्धः। दशाक्षरस्य पादस्य संज्ञा वैराज इति। एकादशाक्षरस्य पादस्य त्रैष्टुभ इति। द्वादशाक्षरस्य पादस्य जागत इति। वैराजादिप्रदेशाः—नवको वैराजस्त्रैष्टुभश्च, त्रिजागतोऽष्टकबृहतीत्येवमादयः। सूत्र्यते पिङ्गलेनापि ह्ययमर्थो महात्मना—

विराजो दिशः, त्रिष्टुभो रुद्राः, जगत्या आदित्या इति। दशाक्षरा विराट्, एकादशाक्षरा त्रिष्टुप्, द्वादशाक्षरा जगतीति श्रुतिरपि पादाभिप्रायेणैव।

दे० तत्र छन्दसां पादविशेषेण संज्ञाविशेषाभिधाने दशाक्षरैकादशाक्षरद्वादशाक्षराणां पादानां यथाक्रमं वैराजत्रैष्टुभजागता इति तिस्रः संज्ञाः। दशाक्षराणामित्यत्र पादानामिति शेषः। अक्षरशब्दस्य प्रत्येकं सम्बन्धः। तेन दशाक्षरस्य पादस्य वैराज इति संज्ञा। एकादशाक्षरस्य त्रैष्टुभ इति। द्वादशाक्षरस्य जागत इति। संज्ञाकरणं संव्यवहारार्थम्। संव्यवहारश्च नवको वैराजस्त्रैष्टुभश्चेति त्रिजागतोर्ध्ववृहतीत्येवमादौ। पिङ्गलोऽपि, 'पादः, इयादिपूरणम्, गायत्र्या वसवः, जगत्या आदित्याः, विराजो दिशः, त्रिष्टुभो रुद्रा' इत्याह। दशाक्षरा विराट्, एकादशाक्षरा त्रिष्टुप्, द्वादशाक्षरा वै जगतीत्यादिश्रुतिरपि पादाक्षराभिप्रायेणैव।

[अनादेशपरिभाषा]

अनादेशेऽष्टाक्षराः पादाः ॥१।१२॥

ष० अक्षरसंख्यानुक्तौ पादोऽष्टाक्षरो भवतीति पूर्वसप्तके। तेन त्रिपदा गायत्रीत्यादौ त्वष्टकेत्यादि सिद्धम्।

दे० अनादेशेऽक्षरसंख्यानुक्तौ पादा अष्टाक्षरा भवन्ति।

चतुष्पदाश्चचः ॥१।१३॥

ष० तत्रानादेश इत्येव। आद्यसप्तकेऽनुक्तपादसंख्या ऋचश्चतुर्भिः पादैर्युक्ता भवन्ति। तेन तृतीयमनुष्टुबित्यत्र चतुष्पदा ऋचो भवन्ति। अथादितः सप्त च्छन्दांसि पादविशेषात्संज्ञाविशेषान्विविच्य दर्शयितुमुपक्रमते—

दे० चकारादनादेशेऽनुक्तपादसङ्ख्या ऋचश्चतुष्पदा भवन्ति।

द्वितीयश्छन्दोलक्षणनिरूपणखण्डः

[गायत्र्यधिकारः]

प्रथमं छन्दस्त्रिपदा गायत्री ॥२।१॥

ष० चतुर्दशच्छन्दसामाविर्भूतं गीतासु च स्वयं साक्षाद्भगवता, गायत्री छन्दसामहमित्युक्तत्वात्प्रधानभूतं च। गायतां त्राणाद् गायत्रीति निरुक्तं नाम च्छन्दसः। त्रिपदा पादत्रययुक्ता। त्रित्वं चतुष्कनिवृत्त्यर्थम्। पादाश्च

त्रयोऽष्टाक्षराः। उदाहरणम्—अग्निमीले पुरोहितम् इत्यादि। गायत्रीति प्रागुष्णिहोऽधिकारः। प्रथमं छन्द इति श्रुत्यनुकरणम्। एवमुत्तरत्र द्वितीयमित्यादि सप्तममित्यन्तम्। सकलश्रुतिदर्शी ह्ययमाचार्यः।

दे० चतुर्विंशत्यक्षरं प्रथमं छन्दो गायत्री। सा च त्रिपदा भवति। त्रयः पादा यस्याः सा त्रिपदा। पादस्य लोपोऽहस्त्यादिभ्य इत्यन्तलोपः। टाबृचीति टाप्। पादः पत्। अस्या उदाहरणं समिधाग्निन्दुवस्यतेत्यादिकम्। अस्या अष्टाक्षरास्त्रयः पादाः। तथा च छन्दोगानाम्, त्रयोऽष्टकाः स्वभावस्त्विति। गायत्रीति प्रागुष्णिहोऽधिकारः।

पञ्चकाश्चत्वारः षटकश्चैकश्चतुर्थश्चतुष्को वा पदपंक्तिः ॥२।२॥

ष० गायत्रीत्येव। अत्र संज्ञिनौ द्वौ पदपंक्तिरिति संज्ञा। आदितश्चत्वारः पादाः पञ्चकः पञ्चमः षडक्षरः। एषा पदपंक्तिर्गायत्री। अधा ह्यग्ने। इयं वा पदपंक्तिः। आदितस्त्रयः पंचकाश्चतुरक्षरः पञ्चमः षडक्षर इति। अग्ने तमद्य।

दे० गायत्रीत्यनुवर्तते। पञ्चाक्षराणि परिमाणमस्यासौ पञ्चकः। संख्याया अतिशदन्तायाः कन्। एवं षट्कादयोऽपि। पञ्चकाः पञ्चाक्षराश्चत्वारः पादाः। एकः षट्कः षडक्षरः। अथवा चतुर्थः पादश्चतुष्कश्चतुरक्षरः सा षड्विंशत्यक्षरा पञ्चविंशत्यक्षरा वा पदपङ्क्तिर्गायत्री। अधा ह्यग्न इति प्रथमपक्षस्योदाहरणम्। चतुर्थश्चतुष्को वेत्यस्योदारणमग्ने तमद्येति। तदुक्तं पिङ्गले-पदपङ्क्तिः पञ्च, चतुष्कषट्कौ त्रयश्चेति।

षट्सप्तैकादशा उष्णिग्गर्भा ॥२।३॥

ष० प्रत्येकान्वयिनः कनो लुक् छान्दसः। षट्कः सप्तक एकादशक इति त्रयः पादा यस्या उष्णिग्गर्भा सा। ता मे अश्व्यानाम्।

दे० गायत्रीत्येव। यस्याः षडक्षरसप्ताक्षरैकादशाक्षराः क्रमेण त्रयः पादाः सा चतुर्विंशत्यक्षरोष्णिग्गर्भा गायत्री भवति। उदाहरणमृग्वेदे-ता मे अश्व्यानाम्।

त्रयः सप्तकाः पादनिचृत् ॥२।४॥

ष० सा हि पादनिचृद्यस्यास्त्रयः पादास्तु सप्तकाः।
युवाकु हि शचीनाम् अग्नी षु णः सखीनाम्॥

दे० यस्या गायत्र्यास्त्रयः सप्ताक्षराः पादाः सैकविंशत्यक्षरा पादनिचृत्संज्ञा गायत्री। अभीषुणः सखीनामित्युदाहरणम्। तथा च पिङ्गलः-क्वचित्त्रिपादृषिभिः, सा पादनिचृदिति। त्रिपात् पादनिचृत्संज्ञिका सप्ताक्षरैरिति छन्दोगानाम्। अत्र पिङ्गले विशेषः—आद्यश्चतुष्पादृतुभिरिति। आद्यं प्रथमं गायत्रीसंज्ञं छन्द ऋतुभिः षडक्षरैश्चतुर्भिः पादैश्चतुष्पाद्भवति। छन्दोगानां च, चतुष्पाच्चेद्गायत्री षडक्षरैरिति।

मध्यमः षट्कश्चेदतिनिचृत् ॥२।५॥

ष० आद्यपादस्तृतीयश्च सप्तको मध्यमो यदि।
षडक्षरः सा विज्ञेया गायत्र्यतिनिचृत्स्विति॥

पुरुत्तमं पुरूणां स्तोतृणां विश्वाचि। ननु च—

षट्कसप्तकमध्येऽष्टावतिपादनिचृत्स्विति।
पैंगलसूत्रिते शास्त्रे तत् किं नैवेह सूत्र्यते॥
यथा निचृत्त्यादनिचृद्वर्धमानादि सूत्र्यते।
उदाहृतिश्च प्रेष्ठं वः प्रेष्ठमु प्रियाणामिति॥

उच्यते—व्यूहेनैते हि गायत्र्यावित्यत्र तन्न सूत्र्यते।
सावित्रीति तदित्याद्या गायत्री व्यूहनाद्यथा॥

दे० यस्या आद्यतृतीयौ सप्ताक्षरौ, मध्यमः षट्कः षडक्षरः, सा विंशत्यक्षरातिनिचृद्गायत्रीति संज्ञा। उदाहरणमृग्वेदे पुरुत्तमं स्तोतृणामिति।

दशकश्चेद् यवमध्या ॥२।६॥

ष० मध्यम इत्येव।
आद्यः पादस्तृतीयश्च सप्तको मध्यमो यदि।
दशाक्षरः सा गायत्री यवमध्या प्रकीर्तिता॥
स सुन्वे यो वसूनाम्।

दे० गायत्रीत्यनुवर्त्तते। यस्या गायत्र्याः प्रथमतृतीयौ सप्ताक्षरौ पादौ मध्यमो दशाक्षरः, सा चतुर्विंशत्यक्षरा यवमध्या गायत्री। उदाहरणम्-स सुन्वे यो वसूनामिति। तदुक्तम्—

आद्ये पादे तृतीये च सप्तके मध्यमो यदि।
दशाक्षरः सा गायत्री यवमध्या प्रकीर्त्तिता॥ इति।

यस्यास्तु षट्कसप्तकाष्टकाः सा वर्द्धमाना॥२।७॥

ष० यस्याः पादाः क्रमेण स्युः षट्कसप्तकाष्टकास्त्रयः।
सा गायत्री वर्धमाना पादैकाक्षरवर्धनात्॥
त्वमसि प्रशस्यः त्वमग्ने यज्ञानामिति।

दे० गायत्रीत्यनुवर्त्तते। यस्या आद्यः पादः षडक्षरो द्वितीयः सप्ताक्षरस्तृतीयोऽष्टाक्षरः सा वर्द्धमाना गायत्रीति संज्ञा भवति। उदाहरणम्—अधि न इन्द्रेषम्। षट्सप्ताष्टौ च वर्द्धमानेति छन्दोगानाम्।

विपरीता प्रतिष्ठा॥२।८॥

ष० अष्टकः सप्तकः षट्क इति यस्यास्तु पादकाः।
क्रमेण सा प्रतिष्ठोक्ता त्वमग्ने व्रतपा असि॥

दे० या पूर्वोक्तविपरीता प्रथमोऽष्टाक्षरो द्वितीयः सप्ताक्षरस्तृतीयः षडक्षर इत्येवंविधा सैकविंशत्यक्षरा प्रतिष्ठासंज्ञा गायत्री। उदाहरणम्-त्वमग्ने व्रतपा इति। पुरीष्योसि विश्वभरा इति च। तदुक्तं पिङ्गले-अष्टौ सप्त षट् चेति प्रतिष्ठा। एषैव विपरीता वर्द्धमानेति। छन्दोगानामपि, अष्ट-सप्तषड्भिः प्रतिष्ठेति।

द्वौ षट्कौ सप्तकश्चेति ह्रसीयसी॥२।९॥

ष० द्वौ षट्कौ सप्तकश्चान्त्यः प्रेष्ठं सा तु ह्रसीयसी।
इति पादविभागेन नव गायत्र्य ईरिताः॥

दे० गायत्रीत्यनुवर्त्तते। यस्या द्वौ पादौ षडक्षरावेकः सप्ताक्षर एवंविधा सैकोनविंशत्यक्षरा ह्रसीयसी गायत्रीसंज्ञा भवति। उदाहरणमृग्वेदे-प्रेष्ठमु प्रियाणामिति। एवं दश गायत्र्य उक्ताः। तदुक्तम्—

'इति पादविभागेन दश गायत्र्य ईरिताः' इति।

[उष्णिगधिकारः]

द्वितीयमुष्णिक् त्रिपदा॥२।१०॥

ष० उष्णिगिति प्रागनुष्टुभोऽधिकारः। अत्र चतुरुत्तरवृद्धारम्भादूर्ध्वं स्त्रिह्यतीत्युष्णिगिति निरुच्यते। उक्ताद्यपेक्षया गायत्र्याश्च चतुरुत्तरवृद्धान्वयेनोष्णिक्त्वं पंकजादिवद्योगरूढित्वात्।

दे० अष्टाविंशत्यक्षरं द्वितीयं छन्द उष्णिक् सा त्रिपदा भवति। त्रयः पादा यस्याः सा त्रिपदा। उष्णिगित्ययमधिकारः प्रागनुष्टुबधिकारात्।

अन्त्यो द्वादशकः ॥२।११॥

ष० अन्त्यो द्वादशक इत्यष्टाक्षरत्वापवादः। त्रिपदेति चतुष्पदापवादः परिभाषयैव सिद्धत्वात्।

आद्यावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः।
सोष्णिगुदाहृतिः प्रोक्ता य इन्द्र सोमपातमः॥

दे० अस्यास्त्रिपदाया उष्णिहोऽन्त्यस्तृतीयः पादो द्वादशकः। द्वादशाक्षराणि परिमाणमस्यासौ द्वादशकः। प्रथमद्वितीयौ त्वष्टाक्षरावेव। उदाहरणम्—अग्ने वाजस्य गोतम इति। तदुक्तम्—उष्णिग्गायत्रौ जागतश्चेति। छन्दोगानाञ्च—उष्णिगष्टाक्षरौ द्वादशकश्चेति।

अत्राह पिङ्गलः—परोष्णिक् परत इति। छन्दोगानाञ्च—स एवोपरिष्टात्पर उष्णिगिति। स इति द्वादशाक्षरः पादः।

आद्यश्चेत् पुर उष्णिक् ॥२।१२॥

ष० द्वादशक इत्येव।

आद्यो द्वादशकः पादस्त्वष्टकावपरौ यदि।
पुर उष्णिगिति प्रोक्ता सा ह्यप्स्वन्तरुदाहृतिः॥

दे० यस्या उष्णिह आद्यः पादो द्वादशाक्षरः, अन्त्यावष्टाक्षरौ, सा पुरउष्णिक्संज्ञा भवति। आदौ भव आद्यः। आद्यः प्रथमो द्वादशकश्चेत्सा पुर उष्णिगिति सूत्रार्थः। तदुक्तम्—पुर उष्णिक् पुरत इति। छन्दोगानामपि—स पुरश्चेत्पुर उष्णिगिति। स इति द्वादशकः। उदाहरणम् अप्स्वन्तरमृतमिति।

मध्यमश्चेत् ककुप् ॥२।१३॥

ष० द्वादशक इत्येव।

द्वादशाक्षरको मध्ये त्वष्टकावभितो यदि।
सोष्णिक्ककुबिति प्रोक्ता वयमु त्वामपूर्व्य॥

दे० उष्णिहो मध्यमः पादो द्वादशकश्चेत्सा ककुबुष्णिगिति संज्ञा भवति। तदुक्तम्—ककुम्मध्ये चेदन्त्य इति। छन्दोगानामपि—स चेन्मध्ये ककुब्भवतीति। उदाहरणम्—भद्रो नो अग्निराहुत इति।

१. अत्र—मा० सं० २७।११–२२ 'ऊर्ध्वा द्वादशार्चमाप्रियमौष्णिहं विषमपदं प्राजापत्यमाग्नेयमग्निरपश्यत्' इति सर्वानुक्रमण्यां चिन्त्यः

त्रैष्टुभजागतचतुष्काः ककुब्न्यङ्कुशिरा ॥२।१४॥

ष० एकादशाक्षरस्त्वाद्यो द्वितीयो द्वादशाक्षरः।
चतुष्कोऽपीति यस्यां सा ककुम्न्यंकुशिरा मता॥

ददी रेवणस्तन्वे ददिर्वसु। ननु चतुर्थारण्यके ददीरेवण इति द्विपदा नूनमथेत्येकपदेत्येतद्विरुध्यते। न। एतस्या एव क्रत्वर्थं द्विपदैकपदात्वविधेः।

दे० यस्या उष्णिहस्त्रैष्टुभजागतचतुष्काः क्रमेण पादाः। त्रैष्टुभ एकादशाक्षरः प्रथमः। ततो जागतो द्वादशाक्षरो द्वितीयः। ततश्चतुरक्षरस्तृतीयः। सा सप्तविंशत्यक्षरा ककुब्न्यङ्कुशिरेतिसंज्ञा उष्णिग्भवति।

उदाहरणम् ददी रेवण इति।

एकादशिनोः परः षट्कस्तनुशिरा ॥२।१५॥

ष० एकादशाक्षरावाद्यौ तृतीयस्तु षडक्षरः।
यस्याः सैषा तनुशिरा प्र या घोष उदाहृतिः॥

दे० यस्या उष्णिह एकादशिनोरेकादशाक्षरयोर्द्वयोः पादयोः परस्तृतीयः पादः षट्कः षडक्षरः सा तनुशिरेतिसंज्ञा उष्णिक् अष्टाविंशत्यक्षरा। एकादशिनोरिति व्रीह्यादित्वादिनिः। पञ्चम्यर्थे व्यत्ययेन षष्ठी। प्र या घोषेत्युदाहरणमृग्वेदे।

मध्ये चेत् पिपीलिकमध्या ॥२।१६॥

ष० षट्क इत्येव।

एकादशाक्षरः षट्कः पुनरेकादशाक्षरः।
सा पिपीलिकमध्योक्ता हरी यस्येत्युदाहृतिः॥

दे० अयं षडक्षरः पादो मध्ये चेत्साष्टाविंशत्यक्षरा पिपीलिकमध्योष्णिगुच्यते। अग्ने स्वाहा कृणुहीत्युदाहरणम्।

आद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा ॥२।१७॥

ष० आद्यः पञ्चाक्षरः पादस्त्रयस्त्वष्टाक्षराः परे।
अनुष्टुब्गर्भा सा प्रोक्ता पितुं नु स्तोषमित्यसौ॥

दे० यस्या उष्णिह आद्यः पादः पञ्चकः पञ्चाक्षरस्ततस्त्रयः पादा अष्टका अष्टाक्षराः सा एकोनत्रिंशदक्षराऽनुष्टुब्गर्भेतिसंज्ञा उष्णिक्। अस्या उदाहरणम्—पितुन्नु स्तोषमिति।

चतुःसप्तकोष्णिगेव ॥२।१८॥

ष० चतुर्भिः सप्तकैः पादैर्युक्ताप्युष्णिगिहोच्यते ।
नदं व ओदतीनां, मंसीमहीत्युदाहृतिः ॥

द्वितीयमुष्णिक् त्रिपदास्त्रयो द्वादशक इत्यत्र चतुःसप्तका चेति लाघवाय वाच्येऽत्र गुरुसूत्रकरणं चतुःसप्तकोष्णिहोऽल्पप्रयोगत्वसूचनार्थमित्याहुः । कथं पुनः प्र प्र वस्त्रिष्टुमभिषम्, अर्चत प्रार्चत, यो व्यतींरफाणयद् इति तुच्याननुक्रम्य प्रज्ञाता अनुष्टुभः शंसतीति ब्राह्मणं तृचा आनुष्टुभा इति च सूत्रं 'नदं व' इत्यस्या उष्णिक्त्वं नोपपद्यते । तेषु हीयमपि पठ्यते । उच्यते—

अनुष्टुप्पादसाम्येन गुणवादोऽयमुष्णिहः ।
रहस्यब्राह्मणोऽप्येवं सम्यगाम्नायते खलु ॥

नदं व ओदतीनामित्युष्णिगक्षरैर्भवत्यनुष्टुप्पादैरिति ।
इत्युष्णिहोऽष्टावुद्दिष्टाः सम्यक् पादविभेदतः ॥

दे० या चतुःसप्तका, चत्वारः पादाः सप्तकाः सप्ताक्षराण्यस्याः सा चतुःसप्तका, साष्टाविंशत्यक्षरा उष्णिगेवोच्यते । केवलोष्णिक्शब्दवाच्या सैवेत्यर्थः । त्र्यायुषञ्जमदग्नेरित्युदाहरणम् ।

पिङ्गलः—चतुष्पादृषिभिरिति । ऋषिभिः सप्ताक्षरैः पादैरिति । छन्दोगानामपि—चतुष्पाच्चेत्सप्ताक्षरैरिति । इत्यष्टावुष्णिह उक्ताः । तदुक्तम्—'उष्णिहोऽष्टौ समुद्दिष्टाः सम्यक् पादविभागत' इति ।

[अनुष्टुबधिकारः]

तृतीयमनुष्टुप ॥२।१९॥

ष० आ बृहत्या अनुष्टुबधिकारः ।
चतुर्भिरष्टकैः पादैर्युक्तानुष्टुबिहोच्यते ॥
गायन्ति त्वा गायत्रिण इन्द्रं विश्वा अवीवृधन् ।
अनादेशाच्चतुष्पात्त्वं पादाश्चाष्टाक्षरास्तथा ॥

दे० द्वात्रिंशदक्षरं तृतीयं छन्दोऽनुष्टुप्संज्ञं भवति । चतुष्पदाश्चर्च इत्युक्तत्वात्सा चतुष्पदा भवति । पादाश्चाष्टाक्षराः, अनादेशेऽष्टाक्षराः पादा इति प्रागुक्तत्वात् । अस्या उदाहरणम्—अयन्ते योनिर्ऋत्विय इति, येषामध्येतीति च ।

पिङ्गलः—अनुष्टुगायत्रैरिति । छन्दोगानाञ्च—अनुष्टुप्चत्वारोऽष्टका इति । अनुष्टुबित्ययमधिकारः प्राग् बृहत्यधिकारात् ।

पञ्च पञ्चकाः षट्कश्चैको महापदपंक्तिः ॥२।२०॥

ष० पञ्च पञ्चाक्षरा यस्याः षष्ठश्चैकः षडक्षरः ।
सोक्ता महापदपंक्तिस्तव स्वादिष्ठेत्युदाहृतिः ॥

दे० यस्या अनुष्टुभः पञ्च पञ्चकाः पञ्चाक्षराः पञ्च पादा एकः पादः षट्कश्च षडक्षरश्च सैकत्रिंशदक्षरा महापदपङ्क्तिरिति संज्ञा । तव स्वादिष्ठादीत्युदाहरणमृग्वेदे ।

जागतावष्टकश्च कृतिः ॥२।२१॥

ष० द्वादशाक्षरकावाद्यौ तृतीयोऽष्टाक्षरः कृतेः ।
मा कस्मै धातमित्येषा कृत्यनुष्टुबुदाहृतिः ॥

दे० द्वौ पादौ जागतौ द्वादशाक्षरौ तृतीयश्चाष्टकोऽष्टाक्षरो यस्याः सा कृतिसंज्ञाऽनुष्टुप् । मा कस्मै धातमित्युदाहरणम् ।

मध्ये चेदष्टकः पिपीलिकमध्या ॥२।२२॥

ष० यस्या द्वादशकस्त्वाद्यस्तथाष्टद्वादशाक्षरौ ।
सा पिपीलिकमध्योक्ता पर्यू षु प्रेत्युदाहृतिः ॥

दे० कृतिरित्यनुवर्त्तते, जागताविति च । अयमष्टकः पादो जागतयोर्द्वादशाक्षरपादयोर्मध्ये चेद्भवति, प्रथमो द्वादशको द्वितीयोऽष्टकस्तृतीयो द्वादशक इत्येवं तर्हि सा पिपीलिकमध्या कृतिरित्येवंसंज्ञाऽनुष्टुप् कथ्यते । अजीजनीहीत्युदाहरणम् । अत्र पिङ्गलः—त्रिपात्क्वचिज्जागताभ्याञ्च मध्ये ते चेति । छन्दोगानामपि—त्रिपदाप्यष्टाक्षरो द्वादशौ चेति ।

नवकयोर्मध्ये जागतः काविराट् ॥२।२३॥

ष० चेदित्येव ।

नवाक्षरो द्वादशको नवाक्षरक एव चेत् ।
इति पादास्त्रयो यस्याः सा प्रोक्ता काविराडिति ॥

ता विद्वांसा हवामहे वाम् ।

दे० यस्या नवकयोर्नवाक्षरयोः पादयोर्मध्ये जागतो द्वादशाक्षरः पादः सा द्वात्रिंशदक्षरा काविराट्संज्ञाऽनुष्टुब्भवति । ता विद्वांसा हवामह इत्युदाहरणमृग्वेदे ।

नव वैराजत्रयोदशैर्नष्टरूपा ॥२।२४॥

ष० पादैर्युक्तेति शेषः।

नवाक्षरो दशाक्षरस्त्रयोदशाक्षरस्तथा।
इति त्रयो हि यत्रैव नष्टरूपा तथेह सा॥

वि पृच्छामि पाक्या न देवान्।

दे० नवाक्षरदशाक्षरत्रयोदशाक्षरैस्त्रिभिः पादैर्द्वात्रिंशदक्षरा नष्टरूपासंज्ञाऽनुष्टुब्भवति। वाचस्पतये पवस्वेत्युदाहरणम्। रूपेण वो रूपमित्युदाहरणमिति केचित्। वि पृच्छामि पाक्यान देवानित्युदाहरणमृग्वेदे।

दशकास्त्रयो विराट् ॥२।२५॥

प० दशाक्षरास्त्रयः पादा यस्याः सा हि विराड् भवेत्।
त्रयोग्रहस्त्वनादेशाच्चतुष्पात्त्वं तु मा स्म भूत्॥

पिबा सोममिन्द्र मन्दतु त्वा।

दे० यस्या दशका दशाक्षरास्त्रयः पादाः सा त्रिंशदक्षरा विराडनुष्टुब्भवति। उदाहरणम्—प्रद्धोऽग्ने दीदिहि पुरो न इति।

एकादशका वा ॥२।२६॥

ष० त्रय इत्येव विराडिति च।

एकादशाक्षरा यस्यास्त्रयः सापि विराड् भवेत्।

दुहीयन्मित्रधितये युवाकु।

इत्यनुष्टुभ उद्दिष्टा अष्टौ पादप्रभेदतः॥

दे० त्रयो विराडित्यनुवर्त्तते। यस्या एकादशाक्षरास्त्रयः पादाः साऽपि त्रयस्त्रिंशदक्षरा विराडित्युच्यते। वा विकल्पार्थः। उदाहरणम्—पयः पृथिव्यामित्यादि।

एवमष्टावनुष्टुभ उक्ताः। तदुक्तम्—'इत्यनुष्टुभ उद्दिष्टा अष्टौ पादप्रभेदत' इति।

[बृहत्यधिकारः]

चतुर्थं बृहती ॥२।२७॥

ष० आपंक्तेर्बृहत्यधिक्रियते।

दे० षड्त्रिंशदक्षरं चतुर्थं छन्दो बृहती संज्ञा भवति। बृहतीत्ययमधिकारः प्राक् पङ्क्त्यधिकारात्। इयमपि चतुष्पदा। चतुष्पदाश्चर्च इति प्रागुक्तत्वात्।

तृतीयो द्वादशकः ॥२।२८॥

ष० आदितोऽष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः।
चतुर्थोऽष्टाक्षरश्चेति बृहती खलु वै भवेत्॥

अभि त्वा शूर नोनुम उत्तिष्ठ ब्रह्मणस्पते।
अष्टाक्षरचतुष्पात्त्वमवादेशेन लभ्यते॥

दे० अस्यास्तृतीयो द्वादशको द्वादशाक्षरः। अन्ये प्रथमद्वितीयचतुर्था अष्टाक्षराः। उदाहरणमेनावां अग्निं नमस्येत्यादिकम्।

अत्र पिङ्गलः—बृहती जागतस्त्रयश्च गायत्रा इति। छन्दोगानामपि—बृहती त्रयोऽष्टाक्षरा द्वादशश्चेति।

आद्यश्चेत् पुरस्ताद्बृहती ॥ २।२९ ॥

ष० द्वादशक इत्येव।

द्वादशाक्षर आदौ चेदष्टकाश्च परे त्रयः।
पादा यस्या हि सा प्रोक्ता पुरस्ताद्बृहतीति वै॥

महो यस्पतिः शवसो असाम्या कुह श्रुत इन्द्रः।

दे० छन्दोगानामपि—प्रथमकल्पेनोपरिष्टाद्बृहती विपरीता पुरस्ताद्बृहतीति। अन्त्यो द्वादशक इति प्रथमः कल्पस्ततो विपरीता, आद्यो द्वादशक इति। उदाहरणम्—परि माग्न इति।

द्वितीयश्चेन्न्यङ्कुसारिणी ॥ २।३० ॥

ष० द्वादशक इत्येव।

दे० यस्या बृहत्या द्वितीयः पादो द्वादशकः सा न्यङ्कुसारिणीसंज्ञा। उदाहरणम्—अयमग्निर्गृहपतिरिति।

उरोबृहती स्कन्धोग्रीवी वा ॥ २।३१ ॥

ष० आदितोऽष्टाक्षरः पादो द्वितीयो द्वादशाक्षरः।

पादावथाष्टकौ सोक्ता त्रिभिरेव तु नामभिः॥

ऋषीणां मतभेदो हि नामभेदेऽस्ति कारणम् ।
पिङ्गलस्य मते चेयं महर्षेर्न्यङ्कुसारिणी ॥
स्कन्धोग्रीवी क्रौष्टुकेश्च यास्कस्योरोबृहत्यपि ।
मत्स्यपायि ते महः । इन्दुरिति रेफव्यूनं तृतीयोऽष्टाक्षरः ।

दे० अस्या पूर्वसूत्रोक्ताया एव बृहत्या वैकल्पिकमेतत्संज्ञाद्वयम् । यस्या न्यङ्कुसारिणीतिसंज्ञा विहिता सा उरोबृहती वा स्कन्धोग्रीवी वा इत्येवंसंज्ञाऽपि भवति । तथा च पिङ्गलः—न्यङ्कुसारिणी द्वितीयः, स्कन्धोग्रीवी क्रौष्टुकेः, उरोबृहती यास्कस्येति । छन्दोगानामपि—द्वितीयेन न्यङ्कुसारिणी स्कन्धोग्रीवी वोरोबृहती यास्क इति ।

अन्त्यश्चेदुपरिष्टाद्बृहती ॥ २।३२ ॥

ष० द्वादशक इत्येव ।
आदितस्त्वष्टका यस्यास्त्रयोऽन्त्यो द्वादशाक्षरः ।
उपरिष्टादबृहत्येषा, न तमंह उदाहृतिः ॥

दे० यस्या बृहत्या अन्त्यः पादो द्वादशाक्षरोऽन्ये त्रयोऽष्टाक्षराः सा षट्त्रिंशदक्षरा उपरिष्टाद्बृहतीत्युच्यते । पिङ्गलोऽपि—उपरिष्टादबृहत्यन्त इति । छन्दोगानान्तु प्रागुक्तम् । अन्नपतेऽन्नस्य नो देहीत्याद्युदाहरणम् ।

अष्टिनोर्मध्ये दशकौ विष्टारबृहती ॥ २।३३ ॥

ष० चेदित्येव । अष्टास्य सन्तीत्यष्टी ।
यद्यष्टाक्षरयोर्मध्ये पादौ स्यातां दशाक्षरौ ।
विष्टारबृहती सोक्ता, युवं ह्यास्तमुदाहृतिः ॥

दे० यस्या अष्टिनोरष्टाक्षरयोः पादयोर्मध्ये दशकौ दशाक्षरौ पादौ सा षट्त्रिंशदक्षरा विष्टारबृहती । युवं ह्यास्तं मह इत्युदाहरणमृग्वेदे । पिङ्गलः—वैराजौ गायत्री चेति । छन्दोगानां च—अथापि दशाक्षरावष्टाक्षरौ चेति ।

त्रिजागतोर्ध्वबृहती ॥ २।३४ ॥

ष० त्रयो द्वादशका यस्याः सा होर्ध्वबृहती मता ।
अजीजनो अमृत मर्त्येष्वा दिवः पीयूषं पूर्व्यं यदुक्थ्यम् ॥

दे० त्रयः पादा जागता द्वादशाक्षरा यस्याः सा त्रिजागता, सा षट्त्रिंशदक्षरा ऊर्ध्वबृहतीसंज्ञा । अस्या उदाहरणम्—अग्नेऽभ्यावर्त्तिन्नित्यादिकम् ।

त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या ॥ २।३५ ॥

ष० यदि ह्यष्टाक्षरो मध्ये त्रयोदशाक्षरयोर्भवेत् ।
सा पिपीलिकमध्योक्ता बृहती द्वित्रयोदशात् ॥

अभि वो वीरमंधसो मदेषु गाय ।

दे० यस्यास्त्रयोदशिनोस्त्रयोदशाक्षरयोः पादयोर्मध्येऽष्टकोऽष्टाक्षरः पादः सा चतुस्त्रिंशदक्षरा पिपीलिकमध्या बृहती संज्ञा ।

अस्या उदाहरणम् पृथिव्यामहमित्यादिकम् ।

नवकाष्टकैकादशाष्टिनो विषमपदा ॥ २।३६ ॥

ष० नवाक्षरोऽष्टाक्षरश्च तथैवैकादशाक्षरः ।
चतुर्थोऽष्टाक्षरश्चेति पादा यस्यास्तु सोच्यते ।
बृहत्येषा तु विषमपदेति खलु बहृचैः ॥
सनितः सुसनितरुग्र ।

दे० यस्या नवाक्षराष्टाक्षरैकादशाक्षराष्टाक्षराः क्रमेण पादाः सा षट्त्रिंशदक्षरा विषमपदा बृहतीत्युच्यते । सनितः सुसनितरुग्र इत्युदाहरणम् । तथा चोक्तम्—

नवाक्षरोऽष्टाक्षरश्च तथैवैकादशाक्षरः ।
चतुर्थोऽष्टाक्षरश्चेति पादा यस्यास्तु सोच्यते ॥
बृहत्येषा तु विषमपदेति खलु बहृचैः ॥ इति ।

चतुर्नवका बृहत्येव ॥ २।३७ ॥

ष० चतुर्भिर्नवकैः पादैर्युक्तापि बृहती मता ।
तं त्वा वयं पितो वचोभिः ।

चतुर्थं बृहती तृतीयो द्वादशक इत्यत्र लाघवाय चतुर्नवकाश्चेति वाक्येऽल्पप्रयोगसूचनार्थं गुरुसूत्रकरणमित्याहुः । तथा च सूत्र्यते हि भगवता पिङ्गलेन पाणिन्यनुजेन—क्वचिन्नवकाश्चत्वार इति । तत्र क्वचिदिति हि प्रयोगाल्पत्वं सूच्यते ।

इति बहृचसिंहेन बृहत्यो नव कीर्तिताः ॥

दे० चत्वारो नवका नवाक्षराः पादा यस्याः सा तथा सा बृहत्येव । केवलबृहतीशब्दवाच्या संवेत्यर्थः । तथा चोक्तम्—चतुर्भिर्नवकैः पादैर्युक्ताऽपि बृहती मता । उदाहरणमृग्वेदे—तं त्वा वयं पितो वचोभिरिति ।

पिङ्गलश्च—क्वचिन्नवकाश्चत्वार इति। तथा—त्रिभिर्जागतैर्महाबृहती—सतोबृहती ताण्डिन इति च।

इति नव बृहत्य उक्ताः। तदुक्तम्—बह्वृचाचार्यसिंहेन बृहत्यो नव ईरिता, इति।

[पङ्क्त्यधिकारः]

पञ्चमं पङ्क्तिः पञ्चपदा ॥ २।३८ ॥

ष० आत्रिष्टुभः पंक्त्यधिकारः। अत्र पञ्चपदेत्युक्तेश्चतुष्पात्त्वं मा स्म भूत्।

अष्टाक्षराः पञ्चपादा यस्याः सा पंक्तिरुच्यते।
इन्द्रो मदाय वावृधे, इत्था हि सोम इन्महे॥

दे० चत्वारिंशदक्षरं पञ्चमं छन्दः पञ्चपदा पङ्क्तिर्भवति। पञ्च पादा यस्याः सा पञ्चपदा। अस्या उदाहरणमग्निं तम्मन्येयो वसुरित्यादिकम्।

पादास्तु अष्टाक्षरा एव। अनादेशेऽष्टाक्षराः पादा इति प्रागुक्तत्वात्। पङ्क्तिरित्ययमधिकारः प्राक्त्रिष्टुबधिकारात्।

अत्राह पिङ्गलः—पथ्या पञ्चभिर्गायत्रैरिति। छन्दोगानामपि—गायत्रैः पञ्चभिः पथ्येति। प्रातिशाख्येऽपि[1]—अष्टाक्षराः पञ्च पादा यस्याः सा पङ्क्तिरुच्यते।

अथ चतुष्पदा ॥ २।३९ ॥

ष० पंक्तिरुच्यते इति शेषः। अथेत्यधिकारे। तेन विराड् दशकैरित्यादौ चतुर्भिः पादैरिति सिद्धं भवति। असत्यस्मिन्योगेऽनादेशसिद्धचतुष्पादत्वस्य पञ्चपदाधिकारेण बाधः स्यात्।

दे० अथानन्तरं चतुष्पदा पङ्क्तिरुच्यत इति शेषः।

विराड् दशकाः ॥ २।४० ॥

ष० दशाक्षरैश्चतुर्भिस्तु पादैः पंक्तिर्युता विराट्।
ऋतस्य पथि वेधा अपायि।

दे० यस्याः पङ्क्तेर्दशका दशाक्षराश्चत्वारः पादाः सा विराट्पङ्क्तिरित्युच्यते। विराड् दशकैरिति केचित् पठन्ति। वैराजैर्विराडित्यपरे। स एवार्थः। उदाहरणम्—समुद्रे ते हृदयमप्स्वन्तरिति।

१. द्र० ऋ० प्रा० १६।५४

अयुजौ जागतौ सतोबृहती ॥ २।४१ ॥

ष० तृतीयाद्यौ द्वादशकौ द्वितीयान्त्यौ तथाष्टकौ।
यस्याः सतोबृहत्येषा न त्वावानित्युदाहृतिः॥

दे० यस्याः पङ्क्तेरयुजौ प्रथमतृतीयौ पादौ जागतौ द्वादशाक्षरौ द्वितीयचतुर्थौ त्वष्टाक्षरौ, सतोबृहतीत्येवंसंज्ञा पङ्क्तिरुच्यते। तथा चोक्तम्—

आदेशेऽष्टाक्षरौ विद्यात् सोपसर्गेषु नामसु।
युग्मावष्टाक्षरौ पादावयुजौ द्वादशाक्षरौ॥
सा सतोबृहती नाम विपरीता विपर्यये॥ इति। (ऋ० प्रा०)

पिङ्गलेनास्याः सतः पङ्क्तिरिति संज्ञोक्ता—पङ्क्तिर्जागतौ गायत्री च, पूर्वौ चेदयुजौ सतःपङ्क्तिर्विपरीतौ चेति।

उदाहरणम्—न त्वावां अन्यो दिव्य इत्यादिकम्।

युजौ चेद् विपरीता ॥ २।४२ ॥

ष० जागताविति शेषः।

द्वितीयान्त्यौ द्वादशकौ तृतीयाद्यौ तथाष्टकौ।
यस्याः सा विपरीतेतिनाम्नोक्ता बह्वृचोत्तमैः॥

य ऋष्वः श्रावयत्सखा।

दे० यस्या युजौ द्वितीयचतुर्थौ पादौ द्वादशाक्षरौ अर्थात् प्रथमतृतीयावष्टाक्षरौ सा चत्वारिंशदक्षरा विपरीता बृहती।

अस्या उदाहरणम्—यत्ते सोम दिवीत्यादि।

आद्यौ चेत् प्रस्तारपङ्क्तिः ॥ २।४३ ॥

ष० जागताविति शेषः।

आद्यौ द्वादशकौ पादावष्टकौ च परौ यदि।
प्रस्तारपंक्तिः सा प्रोक्तोच्छ्वञ्चस्वेत्याद्युदाहृतिः॥

दे० यस्या आद्यौ प्रथमौ पादौ द्वादशाक्षरौ तृतीयचतुर्थावष्टाक्षरौ सा चत्वारिंशदक्षरा प्रस्तारपङ्क्तिः। अस्या उदाहरणम्—भूरसीत्यादि। पिङ्गलः—प्रस्तारपङ्क्तिः पुरत इति। छन्दोगानामपि—क्रमेण जागत्रौ गायत्री च प्रस्तारपङ्क्तिरिति।

अन्त्यौ चदास्तारपङ्क्तिः ॥ २।४४ ॥

प० जागतावित्येव ।

आद्यावष्टाक्षरौ पादौ ततो द्वादशकौ परौ ।
यस्याः सास्तारपंक्तिः स्यादाग्ने नित्वेषु सा हृतिः ॥

दे० यस्या अन्त्यौ तृतीयचतुर्थौ द्वादशाक्षरौ प्रथमद्वितीयावष्टाक्षरौ सा आस्तारपङ्क्तिश्चत्वारिंशदक्षरा । अस्या उदाहरणम्—समस्मे देव्या धियेत्यादि ।

पिङ्गलः—आस्तारपङ्क्तिः परत इति । विपरीताऽऽस्तारेति छन्दोलक्षणम् ।

आद्यन्तौ चेत् संस्तारपंक्तिः ॥ २।४५ ॥

प० जागतावित्येव ।

द्वादशाक्षरयोर्मध्ये पादावष्टाक्षरौ यदि ।
यस्याः संस्तारपंक्तिः स्यात्, पितुभृतो न तन्तुमित् ॥

ननु च, आ याहि वनसा सहेति द्विपदाः शंसति आ याहि वनसा सहेमा नु कं वभ्रुरेक इति द्विपदासूक्तानीति ब्राह्मणसूत्राभ्याम् आ याहि संवर्त उषस्यं द्वैपदमिति सर्वानुक्रमण्यां च द्विपदासूक्ते पितुभृत इत्येषा पठ्यते । तत्कथमियं चतुष्पदोदाह्रियते ? उच्यते—द्विर्द्विपदा ऋचः समामनन्तीति द्वयोर्द्विपदयोरध्ययन एकर्चत्वमत्रैव वक्ष्यते । तेन चतुष्पात्त्वमित्यदोषः ।

दे० यस्या आद्यन्तौ प्रथमचतुर्थौ पादौ द्वादशाक्षरौ द्वितीयतृतीयावष्टाक्षरौ सा चत्वारिंशदक्षरा संस्तारपङ्क्तिः । पितुभृतो न तन्तुमित्युदाहरणमृग्वेदे ।

तथा च पिङ्गलः—संस्तारपङ्क्तिर्बहिरिति ।

मध्यमौ चेद् विष्टारपंक्तिः ॥ २।४६ ॥

प० जागतावित्येव ।

यस्यास्त्वष्टकयोर्मध्ये भवेतां द्वादशाक्षरौ ।
विष्टारपंक्तिः सा प्रोक्ता ह्यग्ने तव श्रवो वयः ॥

इति पङ्क्तय उद्दिष्टा अष्टौ शिष्टेष्टपुष्टिदाः ।
बहृवृचाचार्यसिंहेन कात्यायनमहर्षिणा ॥

दे० यस्या अन्त्यौ द्वितीयतृतीयौ पादौ जागतौ द्वादशाक्षरौ प्रथमचतुर्थावष्टाक्षरौ सा चत्वारिंशदक्षरा विष्टारपङ्क्तिः । अस्या उदाहरणमग्ने तव श्रवो वय इति । तथा च पिङ्गलः—विष्टारपङ्क्तिरन्तत इति ।

इत्यष्टौ पङ्क्तय उक्ताः । तदुक्तम्—

इति पङ्क्तय उद्दिष्टा अष्टौ शिष्टेष्टपुष्टिदाः ।
बहृवृचाचार्यसिंहेन कात्यायनमहर्षिणा ॥ इति ।

[त्रिष्टुबधिकारः]

षष्ठं त्रिष्टुप् त्रैष्टुभपदा ॥ २।४७ ॥

प० अतोऽनन्तरमस्त्रिष्टुबधिकारः । त्रैष्टुभमित्यनादेशाष्टाक्षरनिवृत्त्यर्थम् । पादाश्च चत्वारोऽनादेशात् । चत्वार एकादशकास्तु पादा यस्याः सोक्ता त्रिष्टुबाचार्यविशिष्टैः । कस्य नूनम् ।

दे० चतुश्चत्वारिंशदक्षरं षष्ठं छन्दस्त्रिष्टुप् त्रैष्टुभपदा भवति । त्रैष्टुभा एकादशाक्षराश्चत्वारः पादा यस्या सा त्रैष्टुभपदा ।

अस्या उदाहरणम्—पुरा क्रूरस्येत्यादि ।

द्वौ तु जागतौ यस्याः सा जागते जगती ॥ २।४८ ॥

प० यस्या द्वादशकौ पादावन्त्यावेकादशाक्षरौ ।
त्रिष्टुब् जागतसूक्तस्था सोच्यते जगतीति वै ॥
इमं स्तोममिदं सूक्तं जागतं त्वियमत्र च ॥
यस्मै त्वमायजसे ।

दे० यस्या द्वौ पादौ जागतौ द्वादशाक्षरौ सा जागते जगतीछन्दस्के ऋग्गणे जगती । अस्या उदाहरणम्—तं नो वातो मयोभ्विति ।

त्रैष्टुभे त्रिष्टुप् ॥ २।४९ ॥

प० सैव त्रैष्टुभसूक्तस्था त्रिष्टुबित्युच्यते यथा ।
रूपन्नस्का ये वाजिनम् इत्येतत्सूक्तं हि त्रैष्टुभम् ॥

दे० यस्या द्वौ पादौ जागतौ सा त्रैष्टुभे त्रिष्टुप्छन्दस्के ऋग्गणे त्रिष्टुप्संज्ञिका । अस्या उदाहरणम्—ये वाजिनं परिपश्यन्तीति । तदुक्तम्—

यस्या द्वादशकौ पादावन्त्यावेकादशाक्षरौ ।
त्रिष्टुब्जागतसूक्तस्था सोच्यते जगतीति वै ॥
सैव त्रैष्टुभसूक्तस्था त्रिष्टुबित्युच्यते यथा ।
यूपव्रस्काये वाजिनं नाम सूक्तं हि त्रैष्टुभम् ॥

वैराजौ जागतौ चाभिसारिणी ॥ २।५० ॥

ष० यस्या दशाक्षरौ पादौ ततो वै द्वादशाक्षरौ ।
सोक्ताभिसारिणी त्रिष्टुब् यो वाचा वीत्युदाहृतिः ॥

वे० यस्या वैराजौ दशाक्षरौ द्वौ पादौ तथा जागतौ द्वादशाक्षरौ पादौ सा चतुश्चत्वारिंशदक्षरा अभिसारिणीसंज्ञा । यो वाचा इत्युदाहरणमृग्वेदे ।

नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थाना ॥ २।५१ ॥

ष० यस्या नवाक्षरौ पादौ तृतीयो दशकस्तथा ।
एकादशाक्षरोऽन्त्यश्च विराट्स्थाना तु सा मता ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः ।
यस्या दशाक्षरावाद्यौ तृतीयश्च नवाक्षरः ।
एकादशाक्षरश्चान्त्यो विराट्स्थानैव सापि च ॥

श्रुधी हवमिन्द्र मा रिषण्यः । वेति प्रकारविकल्पार्थम् ।

वे० यस्या नवकौ द्वौ पादौ नवाक्षरौ एको वैराज एको दशाक्षर एकस्त्रैष्टुभ एकादशाक्षरः सैकोनचत्वारिंशदक्षरा विराट्स्थानासंज्ञा । अस्या उदाहरणम्—स्वस्ति न इन्द्रो वृद्धश्रवा इत्यादिकम् । अथवा द्वौ पादौ वैराजौ दशाक्षरावेको नवको नवाक्षर एकस्त्रैष्टुभ एकादशाक्षरः सा चत्वारिंशदक्षरा विराट्स्थाना । अस्या उदाहरणम्—स्वस्ति न इन्द्रो वृद्धश्रवा इत्यादिकम् । तथा चोक्तम्—

यस्या नवाक्षरौ पादौ तृतीयो दशकस्तथा ।
एकादशाक्षरोऽन्त्यश्च विराट्स्थाना तु सा मता ॥

तथा—

यस्या दशाक्षरावाद्यौ तृतीयश्च नवाक्षरः ।
एकादशाक्षरश्चान्त्यो विराट्स्थानैव साऽपि च ॥

वेति प्रकारविकल्पार्थः ।

एकादशिनस्त्रयोऽष्टकश्च विराड्रूपा ॥ २।५२ ॥

ष० एकादशाक्षरा यस्याः पादाः स्युस्त्रय आदितः ।
चतुर्थश्चाष्टकः सोक्ता विराड्रूपेति बह्वृचैः ॥

तुभ्यं श्चोतन्त्यध्रिगो शचीवः श्रुतं मे मित्रावरुणा हवेमेति च । नात्र क्रमादर आ वो रुवण्युमित्यृचि तृतीयस्याष्टकत्वदर्शनात् । बहुवचनस्य त्रित्वाद्यनेकविषयत्वेऽपि कर्पिजलाधिकरणन्यायेनानादेशे चतुष्पदाश्चर्च इति परिभाषया चैकादशाक्षरपादत्रित्वे सिद्धे त्रय इति न्यायप्राप्तानुवादः । श्रुत्यनुकरणं वा ।

वे० यस्या एकादशिनः एकादशाक्षरास्त्रयः पादा एकोऽष्टकोऽष्टाक्षरश्च सैकचत्वारिंशदक्षरा विराड्रूपा त्रिष्टुप् । अस्या उदाहरणम्—सम्बर्हिरङ्क्तामिति । तथा चोक्तम्—

एकादशाक्षरा यस्याः पादाः स्युस्त्रय आदितः ।
चतुर्थस्त्वाष्टकः सोक्ता विराड्रूपेति बह्वृचैः ॥

द्वादशिनस्त्रयोऽष्टकश्च ज्योतिष्मती ॥ २।५३ ॥

ष० यस्या द्वादशकाः पादास्त्रयः क्वाप्यस्ति चाष्टकः ।
एषा ज्योतिष्मती त्रिष्टुबुत्तरत्र ह्युदाहृतिः ॥

वे० यस्या द्वादशिनो द्वादशाक्षरास्त्रयः पादा एकोष्टकोऽष्टाक्षरश्च—२।६२।८।८।१२।१६ रा ज्योतिष्मतीत्येवनामिका त्रिष्टुप् । नरत्रहीत्युदाहरणमृग्वेदे ।

यस्या द्वादशकाः पादास्त्रयः क्वाप्यस्ति चाष्टमः ।
एषा ज्योतिष्मती त्रिष्टुप्नरत्रेत्याद्युदाहृतिः ॥

यतोऽष्टकस्ततो ज्योतिः ॥ २।५४ ॥

ष० यत इति सप्तम्यर्थे तसिल् । तत इत्यनुकरणे । पुरस्ताद्वा मध्ये वोपरिष्टाद्वा यत्राष्टकोऽष्टाक्षरः पादस्तेन युक्तो ज्योतिःशब्दो नाम भवेत् । पुरस्ताज्ज्योतिर्मध्येज्योतिरुपरिष्टाज्ज्योतिरित्येताः संज्ञाः पैंगलेऽपि शास्त्रे दृष्टा हि । तद्यथा—पुरस्ताज्ज्योतिः प्रथमेन, मध्येज्योतिर्मध्यमेन, उपरिष्टाज्ज्योतिरन्त्येन । तत्र पुरस्ताज्ज्योतिरुदाहरणं वेदान्तरे—इमे त इन्द्र

ते वर्षं मे त्वारभ्य चरमपादान्तं। अस्माकं त्वेवम्—इमे ते इन्द्र ते वयं पुरुष्टु-तेति पाठाज्जगत्येव। मण्डूकोतिः—यद्वा वज्रं मनसे संशिशाय: तामिरा यातं वृषणोप मे हवमिति च त्रिष्टुभेन पादेन मध्येज्योतिर्वेदान्तरे—

तदश्विना भिषजा सुष्टुतीनां सरस्वती वयति पेशो अन्तरम्।
अस्थि मज्जानं पासरे: कारोतरेण दधतो गवि स्वरि॥

इति। उपरिष्टाज्ज्योतिः—अग्निनेन्द्रेण वरुणेन विष्णुनेत्याद्याः। ऋतावानं महिषं विश्वदर्शतमिति च। पूर्वत्र तु क्रमाविवक्षयेह त्वनेकसंज्ञार्थो-ऽयमारम्भः। एतदेव ज्ञापकं भवत्यन्यत्रोक्तक्रमविवक्षेति।

दे० यत इति सप्तम्यर्थे। तत इति तु करणे। यत इति यत्र पुरस्ताद्वा मध्ये चोपरिष्टाद्वाऽष्टकः। ततस्तेन युक्तो ज्योतिःशब्दो नाम भवति। यस्या पुरस्तादष्टकः सा पुरस्ताज्ज्योतिः। यस्या मध्येऽष्टकः सा मध्ये-ज्योतिः। यस्याश्चोपरिष्टादष्टकः सोपरिष्टाज्ज्योतिरिति।

तथा च पिङ्गलः—पुरस्ताज्ज्योतिः प्रथमेन, मध्येज्योतिर्मध्येन, उपरिष्टाज्ज्योतिरन्तेनेति। एकोऽष्टकस्ततोऽन्ये त्रयो द्वादशिन एव। तां सवितुरिति पुरस्ताज्ज्योतिष उदाहरणम्। तदश्विना भिषजेति मध्येज्यो-तिषः। ऋतावानं महिषमित्युपरिष्टाज्ज्योतिष इति।

चत्वारोऽष्टकाः आद्यतश्च महाबृहती ॥ २।५५ ॥

ष० चत्वारोऽष्टाक्षराः पादाः क्वाप्यन्यो द्वादशाक्षरः।
यस्यास्तु प्रोच्यते नाम्ना सा महाबृहतीति वै॥

अत्रापि क्रमो न विवक्षितः। तेनादितो द्वादशकोऽन्ततो द्वादशकः सिद्ध्यति। तत्रादितो द्वादशकः—नमोवाके प्रस्थिते अध्वरे नरा। अन्ततो द्वादशकः—नवानां नवतीनामिति व्यूहेत्।

दे० यस्याश्चत्वारोऽष्टका अष्टाक्षराः पादा एको जागतो द्वादशाक्षरः सा चतुश्चत्वारिंशदक्षरा महाबृहतीत्येवंसंज्ञा त्रिष्टुप्। अत्र क्रमो न विवक्षितः। अस्या उदाहरणम्—सीमो राजामृतं सुत इत्यादि। तथा चोक्तम्—

चत्वारोऽष्टाक्षराः पादाः क्वाऽप्यतो द्वादशाक्षरः।
यस्यास्तु प्रोच्यते नाम्ना सा महाबृहतीति वै॥

मध्ये जागतश्चेद् यवमध्या ॥२।५६॥

ष० जागत इत्येव।

आद्यावष्टाक्षरौ यस्मात्तृतीयो द्वादशाक्षरः।
पुनर्द्वावष्टकौ चेत्सा यवमध्या प्रकीर्तिता॥

सं मा तपन्त्यभितः।

दे० चतुर्णामष्टाक्षराणां पादानां मध्ये जागतश्चेत् द्वादशाक्षरः पादश्चेत् सा चतुश्चत्वारिंशदक्षरा यवमध्या नाम त्रिष्टुप्।

अस्या उदाहरणमृग्वेदे सम्मातपन्त्यभित इति। तथा चोक्तम्—

आदावष्टाक्षरौ यस्याः तृतीयो द्वादशाक्षरः।
पुनर्द्वावष्टकौ चेत् सा यवमध्या प्रकीर्तिता॥

आद्यौ दशकावष्टकास्त्रयः पंक्त्युत्तरा विराट्पूर्वा वा ॥२।५७॥

ष० आद्यौ दशाक्षरौ यस्यास्त्रयश्चाष्टाक्षराः परे।
पंक्त्युत्तरा विराट्पूर्वा तस्या द्वे नामनी इमे॥

द्विनामत्वं ब्राह्मणेषु चोक्तिद्वैधोपलंभनात्।

एवेन्द्राग्निभ्यामहावि हव्यम्।

इति त्रिष्टुभ उद्दिष्टा दश कात्यायनर्षिणा॥

दे० यस्या आद्यौ पादौ दशकौ दशाक्षरौ त्रयोऽष्टका अष्टाक्षराः सा षड्क्त्युत्तरा वा विराट्पूर्वा चेति नामविकल्पः।

तथा चोक्तम्—

आद्यौ दशाक्षरौ यस्यास्त्रयश्चाष्टाक्षराः परे।
षड्क्त्युत्तरा विराट्पूर्वेत्यस्या द्वे नामनी इमे॥

एवैन्द्राग्निभ्यामहाविहव्यमित्युदाहरणमृग्वेदे। इति दश त्रिष्टुभ उक्ताः। तदुक्तम्—

दश त्रिष्टुभ उद्दिष्टा। कात्यायनमहर्षिणेति॥

[जगत्यधिकारः]

सप्तमं जगती जागतपदा ॥२।५८॥

ष० आप्रगाथाज्जगत्यधिकारः। जागतेत्यष्टाक्षरनिवृत्त्यर्थम्। अनादेशे चतुष्पात्त्वम्।

यस्याः पादास्तु चत्वारो द्वादशाक्षरसंयुताः।
जगती नाम सा प्रोक्ता इमं स्तोममुदाहृतिः॥

दे० अष्टाचत्वारिंशदक्षरं सप्तमं छन्दो जगती। सा च जागतपदा द्वादशाक्षरपदा इत्यर्थः। जागतेत्यष्टाक्षरनिवृत्त्यर्थम्। चतुष्पदाऽसौ, चतुष्पदाम्बर्चं इत्युक्तेः।

यस्याः पादास्तु चत्वारो द्वादशाक्षरसंयुताः।
जगती नाम सा प्रोक्ता अयमिहेत्युदाहृतिः॥

अष्टिनस्त्रयः स्वौ च द्वौ महासतोबृहती ॥ २।५९ ॥

ष० यस्यास्त्वष्टाक्षराः पादास्त्रयो द्वौ द्वादशाक्षरौ।

महासतोबृह(ती)त्युक्ता सा नात्रोक्तक्रमादरः ॥
आ यः पप्रौ भानुनेति तृतीयाद्यौ हि जागतौ।

तत्र स्वावित्यात्मीयौ जागतावित्यर्थः। कुतः? प्रकृतत्वाज्जगत्याः।

दे० त्रयः पादा यस्या अष्टिनोऽष्टाक्षराः स्वौ च जागतौ द्वौ पादौ सा महासतोबृहती जगती।

यस्यास्त्वष्टाक्षराः पादास्त्रयो द्वौ द्वादशाक्षरौ।

महासतोबृहत्युक्ता सा नात्रोक्तक्रमादरः॥
आ यः पप्रौ भानुनेत्युदाहरणमृग्वेदे।

अष्टकौ सप्तकः षट्को दशको नवकश्च षडष्टका वा महापंक्तिः ॥ २।६० ॥

ष० वेति प्रकारविकल्पे।

आदावष्टाक्षरौ यस्याः सप्तकोऽथ षडक्षरः।
दशाक्षरोऽथ नवकः सा महापंक्तिरुच्यते॥
सूर्ये विषमा सजामीति तिस्रः।

अष्टाक्षरा वा यस्याः षट् सा महापंक्तिरेव हि।
अव द्वके अव त्रिका, उभे यदिन्द्र रोदसी॥
तिस्रो जगत्यस्तु प्रोक्ताः कात्यायनमहर्षिणा॥
इति च्छन्दांसि सप्तेह व्याख्यातानि विभागशः।
एषु च्छन्दोद्वययुताः संज्ञा वक्तुं विजृम्भते॥

दे० यस्या द्वौ पादावष्टकावेकः सप्तक एकः षट्क एको दशक एको नवकश्च साष्टाचत्वारिंशदक्षरा महापङ्क्तिर्नाम जगतीत्युच्यते। अत्रापि न क्रमनियमः। अस्या उदाहरणम्—विश्वस्य मूर्द्धन्नधीति। अथवा या षडष्टका सा महापङ्क्तिः। षट्पदा अष्टका अष्टाक्षरा यस्याः सा षडष्टका। अथवा पृथक् पदे। यस्या अष्टका अष्टाक्षराः षट् पादाः सा महापङ्क्तिर्नाम जगती। अस्या उदाहरणमाजिघ्रकलशं महीत्यादि। वेति प्रकारविकल्पे। तथा चोक्तम्—

आदावष्टाक्षरौ यस्याः सप्तकोऽथ षडक्षरः।
दशाक्षरोऽथ नवकः सा महापङ्क्तिरुच्यते॥
अष्टाक्षरा वा यस्याः षट् सा महापङ्क्तिरेव हि॥ इति।

एवं तिस्रो जगत्य उक्ताः। तदुक्तम्—

तिस्रो जगत्यः सम्प्रोक्ताः कात्यायनमहर्षिणेति।
इति छन्दांसि सप्तेह व्याख्यातानि विभागशः।

पादाक्षरसंख्यानियमस्तु पूर्वसप्तक एवोक्तः। तेनातिजगत्याद्युत्कृत्यन्तेषु छन्दःसु यथाध्ययनमेव पादाक्षरसंख्या भवति।

इयमथछन्दांसीत्यादिका परिभाषा ऋग्वेदानुक्रमणिकासम्बन्धिन्येव, सोपयोगित्वादिह पञ्चमाध्यायत्वेनाध्येतृभिः स्वीकृताऽस्ति। तेनात्र प्रतिपादितानां गायत्र्यादिभेदानां सर्वेषां मध्ये कानिचिदुदाहरणान्यस्यां वाजसनेयसहितायां न सन्ति। तानननुक्रामन्त एवोदाहरिष्याम इति भविष्यदर्थलट्प्रयोगोऽपि परिभाषाया अस्वकीयत्वे लिङ्गम्। अन्यथोदाहरामेत्येवमतीतार्थनिर्देशः स्यात्। किञ्च–तस्मादेतन्नाब्रह्मचारिणे, अनेनाधीतेन चान्द्रायणाब्दफलमवाप्नोतीत्यादिग्रन्थसमाप्तिचिह्नमपि चतुर्थाध्यायान्त एव

वृश्यते । तेनायं ग्रन्थः सर्वोऽपि [illegible] इति ज्ञायते । यतः सर्वेऽपि ग्रन्थान्त एव तद्ग्रन्थाध्ययनतत्पात्रत्वप्रयोजनं दृश्यते ।

माध्यन्दिनीये वाजसनेये [illegible] कृतिर्भगवतः कात्यायनस्यैषा [illegible] ॥३।६१॥

दे० इदमपि सूत्रं परिशालोपजीविभिरन्यैतृभिः प्रक्षिप्तमिव ज्ञायते । माध्यन्दिनीये वाजसनेये यजुर्वेदाम्नाये एषा सर्वानुक्रमणिका भगवतः कात्यायनस्य कृतिः । द्विरभ्यासोऽध्यायपरिसमाप्तिज्ञापनार्थः ।

इति श्रीमहायाज्ञिकश्रीश्रीप्रजापतिसुतमहायाज्ञिकश्रीश्रीदेवकृतेऽनुक्रमणीभाष्ये पञ्चमोऽध्यायः ।

१– कात्यायनीयछन्दःसूत्रेषु २।६० संख्यानन्तरं षड्गुरुशिष्यभाष्यं नास्ति । यतो हि षड्गुरुशिष्यस्तु कात्यायनीग्रायाः ऋक्सर्वानुक्रमणिकायाः भाष्यकारः, न शुक्लयजुस्सर्वानुक्रमण्याः । अस्माकमयं ग्रन्थश्च शुक्लयजुस्सर्वानुक्रमणीमाश्रित्य प्रवर्तते । कात्यायनोक्तायामृक्सर्वानुक्रमण्यामादौ द्वादशखण्डात्मके परिभाषाप्रवर्णने तृतीयः खण्डः 'अथाऽछन्दांसि' (१।१) इत्यनेन सूत्रेण प्रारभ्यते । दशमः खण्डस्तु 'अष्टकौ सप्तकः षट्को दशको नवकश्च षडष्टका वा महापंक्तिः' (२।६०) एतेन सूत्रेण समाप्तिं गच्छति । अत एतावदेवात्र ग्रन्थे षड्गुरुशिष्यभाष्यं वर्तते । सोऽयं षड्गुरुशिष्यो देवयाज्ञिकान्नितरां पूर्वतनः । यतो हि देवयाज्ञिकेन षड्गुरुशिष्यभाष्योक्तयः 'तदुक्तम्' इत्येवं निर्देशेन बहुशो यथावत् (२।२६,३६,३७,४६,४९,५१,५७,५९, ०) यत्र कुत्रचिच्च पाठभेदेन (२।६,९,१८,५२,५३,५५,५६,५८) समुद्धृताः । ऋक्प्रातिशाख्यभाष्यकारादुव्वटाचार्यादपि देवयाज्ञिकोऽर्वाचीन इति भाति । यतो हि '१।६' सूत्रव्याख्यावसरे तदीयव्याख्यानमुव्वटकृतप्रातिशाख्यभाष्येण (ऋ. प्रा. २७।२१) पूर्णतः प्रभावितं दृश्यते (द्र. पृ. ३८,३९) । तत्रास्माभिरुल्लिखितमिदं टिप्पण्याम् । पाणिनितोऽर्वाचीनत्वं तु षड्गुरुशिष्यस्य स्फुटमेव, तदीये (२।३७) सूत्रभाष्ये पिङ्गलाचार्यस्य पाणिन्यनुजत्वेनोल्लेखात् ।

अत्र ग्रन्थे २।६१ सूत्रप्रभृति समाप्ति यावद्वेदयाज्ञिकस्य शुक्लयजुस्सर्वानुक्रमे विरचितं भाष्यमेव वर्तते । सोऽयं देवयाज्ञिकस्तु सायणार्यादर्वाक्तन इति शुक्लयजुस्सर्वानुक्रमभाष्ये (१।१९, सं. ५ अ.) 'अग्निर्देवतेति माधवाचार्याः' इत्येवं तदीयोल्लेखेन स्पष्टं ज्ञायते । एवमेव हरिस्वामिन उल्लेखोऽपि देवयाज्ञिकभाष्ये (मा. सं. २१।२९-४० पृ. २३५) वर्तते ।

तृतीयः प्रकीर्णखण्डः

[छन्दोदेवताधिकारः]

अथातश्छन्दोदेवताः[1] ॥३।१॥

दे० अभिधीयन्त इति शेषः । अथानन्तरं छन्दसां गायत्र्यादीनां देवता अभिधीयन्ते ।

गायत्र्या अग्निः ॥३।२॥

दे० गायत्र्या अग्निर्देवता ।

उष्णिहः सविता ॥३।३॥

दे० देवता ।

अनुष्टुभः सोमः ॥३।४॥

दे० देवता ।

बृहत्या बृहस्पतिः ॥३।५॥

दे० देवता ।

पंक्तेर्वरुणः ॥३।६॥

दे० देवता ।

त्रिष्टुभ इन्द्रः ॥३।७॥

दे० देवता ।

जगत्या विश्वेदेवाः ॥३।८॥

दे० देवता ।

विराजो मित्रः ॥३।९॥

दे० देवता ।

---

१. अत्र ग्रन्थे 'अथातश्छन्दोदेवताः' इत्यादीनि प्रकीर्णखण्डोक्तानि सूत्राणि (३।१-३।९०) शुक्लयजुस्सर्वानुक्रमणिकायाश्चतुर्थाध्याये (दशमखण्डतस्त्रयोदशखण्डपर्यन्तं) सन्ति । कात्यायनोक्तानि तानि छन्दोविषयकाण्येवेत्यत्र सन्ति देवयाज्ञिकभाष्ययुतानि ।

स्वराजो (व)रुणः ॥३।१०॥

दे० देवता ।

अतिच्छन्दसः प्रजापतिः ॥३।११॥

दे० देवता ।

विच्छन्दसो वायुः ॥३।१२॥

दे० देवता ।

द्विपदायाः पुरुषः ॥३।१३॥

दे० देवता ।

एकपदाया ब्रह्मा ॥३।१४॥

दे० देवता ।

सर्वा ऋच आग्नेय्यः ॥३।१५॥

दे० सर्वा ऋच आग्नेय्योऽग्निदेवताका ज्ञेयाः ।

सर्वाणि यजूंषि वायव्यानि ॥३।१६॥

दे० सर्वाणि यजूंषि वायुदेवत्यानि ज्ञेयानि ।

सर्वाणि सामानि सौराणि ॥३।१७॥

दे० सूर्यदेवतानि ।

सर्वाणि ब्राह्मणानि च ॥३।१८॥

दे० चकारात् सूर्यदेवतानि ।

स्वाहाकारस्याग्निः ॥३।१९॥

दे० देवता ।

वषट्कारस्य विश्वेदेवाः ॥३।२०॥

दे० देवता ।

कर्मारम्भे मन्त्राणां देवता वेदितव्याः ॥३।२१॥

दे० कर्मारम्भे कर्मणः प्रारम्भे तत्कर्मोपयोगिनां मन्त्राणां देवता वेदितव्या ज्ञातव्याः ।

संन्यस्य मनसि देवतां ततो हविर्हूयते ॥३।२३॥

दे० होमात्पूर्वं मनसि देवतां संन्यस्य संचिन्त्य संस्मृत्य ततस्तदनन्तरं हविर्हूयते । तथा च यास्कः—यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट् करिष्यन्निति ह ज्ञायत इति । देवतामज्ञात्वा होमकरणे यद्भवति तदाह—

देवतामविज्ञाय यो जुहोति देवास्तस्य हविर्न जुषन्ते ॥३।२४॥

दे० देवतामविज्ञाय अज्ञात्वा यो होमं करोति तस्य हविराज्यादिकं देवा न जुषन्ते न सेवन्ते न स्वीकुर्वन्तीत्यर्थः ।

स्वाध्यायाध्ययनकालेऽपि मन्त्राणां देवताज्ञाने फलमाह—

स्वाध्यायमपि योऽधीते मन्त्रदैवतज्ञः सोऽमुष्मिँल्लोके देवैरपीड्यते ॥३।२४॥

दे० यः पुमान्मन्त्रदेवतज्ञः सन् मन्त्राणां देवता जानन् स्वाध्यायमपि वेदमपि अधीते पठति, स स्वाध्यायपाठकोऽमुष्मिंल्लोके स्वर्गलोके देवैरपीन्द्रादिभिरपीड्यते स्तूयते । इन्द्रादयोऽपि तस्य स्तुतिं कुर्वन्ति किं पुनरन्य इति ।

तस्माच्च देवता वेद्या मन्त्रे मन्त्रे प्रयत्नतः ॥३।२५॥

दे० यतो देवतामज्ञात्वा होमं कुर्वन्तो देवा हविर्न जुषन्ते । यस्माच्च देवतां ज्ञात्वा स्वाध्यायाध्यापको देवैरपि स्तूयते । तस्मात्कारणात्प्रयत्नतो मन्त्रे मन्त्रे देवता वेद्या ज्ञेयाः ।

देवताज्ञानस्य प्रयोजनान्तरमप्याह—

मन्त्राणां देवताज्ञानान्मन्त्रार्थमधिगच्छति ॥३।२६॥

दे० मन्त्राणां देवताज्ञानात् मन्त्रार्थं जानाति ।

मन्त्रार्थज्ञानेन किं भवतीत्यत आह—

मन्त्रार्थज्ञानात्तु विधूतपाप्मा नाकमश्नुते ॥३।२७॥

दे० मन्त्रार्थज्ञानात् विधूतपाप्मा निरस्तपापः क्षीणपापः सन् नाकमश्नुते स्वर्गं प्राप्नोति ।

देवतामज्ञात्वा कर्म कुर्वाणः कर्मणां फलमपि न प्राप्नोतीत्याह—

न हि कश्चिदविज्ञाय याथातथ्येन देवताः ।
श्रौतानां कर्मणां विप्रः स्मार्त्तानां चाश्नुते फलम् ॥३।२८॥

दे० कश्चिद्विप्रो मेधावी याथातथ्येन परमार्थत्वेन अस्य मन्त्रस्येयमेव निश्चिता देवता, अस्येयम् अस्येयम्, इत्येवं देवता अविज्ञाय अज्ञात्वा श्रौतानां कर्मणां स्मार्त्तानां च कर्मणां फलं न हि अश्नुते । नैव प्राप्नोतीत्यर्थः । 'हि हेताववधारण' इत्यमरः । अत्रापि हेतौ अवधारणे वा हीति व्याख्येयम् । हि यतः देवतामज्ञात्वा कर्मणां फलं नाश्नुते तस्माद् देवता ज्ञात्वैव कर्माणि कार्याणीति । अवधारणार्थे तु प्रागेव व्याख्यातम् ।

[देवताधारेण छन्दस आर्षपरिज्ञापनाधिकारः]

अनादिष्टमध्वरादौ सवान्तकर्मणि परिभाषितं मन्त्रगणं वक्ष्यामः ॥ ३।२९ ॥

दे० अध्वरादौ सवान्तकर्मणि अनादिष्टं परिभाषितं मन्त्रगणं वक्ष्यामः । अध्वरादिसवान्ते काण्डत्रयविहिते कर्मण्येतद्देवतैतच्छन्दस्कस्य ऋष्यनादेशे अयमृषिर्ज्ञेय इति भावः । एवमेवाग्रिमाण्यपि सूत्राणि व्याख्येयानि ।

सर्वमाग्नेयं गायत्रं गौतमीयम् ॥ ३।३० ॥

दे० सर्वमग्निदेवतं गायत्रछन्दस्कञ्च मन्त्रगणं गौतमीयं जानीयात् । अग्निदेवतस्य गायत्रछन्दस्कस्य मन्त्रगणस्य गौतमऋषिर्ज्ञेय इत्यर्थः ।

अथ ऋषिदैवतछन्दसामेकैकस्यानादेशे अन्यतराभ्यामादिष्टाभ्यामन्यतरस्यानादिष्टस्य निर्णयः क्रियते । तद्यथा—

यद्गायत्रं गौतमीयञ्चानादिष्टदेवताकं तदाग्नेयमग्निदेवत्यं भवति ।

यच्चाग्नेयं गौतमीयं चानादिष्टछन्दस्कं तद्गायत्रम् ।

यच्चाग्नेयं गायत्रं चानादिष्टर्षिकं तद् गौतमीयं भवतीति । एवं वक्ष्यमाणेषु सूत्रेषु द्रष्टव्यम् ।

सर्वं सावित्रमौष्णिहं भारद्वाजीयम् ॥ ३।३१ ॥

दे० अध्वरादौ सवान्ते कर्मणि सवितृदेवत्यमुष्णिक्छन्दस्कं सर्वमन्त्रगणमनादिष्टर्षिकं भारद्वाजं जानीयात् ।

सर्वं सौम्यमानुष्टुभमाथर्वणिकम् ॥ ३।३२ ॥

दे० सोमदेवत्यमनुष्टुप्छन्दस्कं सर्वमन्त्रगणमनादिष्टर्षिकमाथर्वणिकं जानीयात् । अथर्वा तस्य ऋषिरित्यर्थः ।

सर्वं बार्हस्पत्यं बार्हतमाङ्गिरसम् ॥ ३।३३ ॥

दे० बृहस्पतिदेवतं बृहतीछन्दस्कं सर्वमन्त्रगणमाङ्गिरसं जानीयात् । तस्याङ्गिरा ऋषिर्ज्ञेय इत्यर्थः ।

सर्वं वारुणं पाङ्क्तमालम्बायनीयम् ॥ ३।३४ ॥

दे० वरुणदेवत्यं पङ्क्तिछन्दस्कं सर्वमन्त्रगणमालम्बायनीयं जानीयात् । तस्यालम्बायनऋषिर्ज्ञेय इत्यर्थः ।

सर्वमैन्द्रं त्रैष्टुभं याज्ञवल्कीयम् ॥ ३।३५ ॥

दे० इन्द्रदेवत्यं त्रिष्टुप्छन्दस्कं सर्वं मन्त्रगणं याज्ञवल्कीयं विद्यात् । याज्ञवल्क्यस्तस्य ऋषिरित्यर्थः ।

सर्वमादित्यदैवतं जागतं कौत्सम् ॥ ३।३६ ॥

दे० आदित्यदेवतं जगतीछन्दस्कं सर्वमन्त्रगणं कौत्सं विद्यात् । कुत्सस्येदं कौत्सम् । कुत्सोऽस्य ऋषिरित्यर्थः ।

अध्वरादौ सवान्तकर्मणि अनादिष्टं मन्त्रगणमित्येतत्सप्तस्वपि सूत्रेष्वनुवर्त्तत एव । उदाहरणान्यत्राभियुक्तैः प्रयत्नतो गवेषणीयानि ।

[यज्ञमुखेन ऋषिदेवतछन्दोविज्ञापनाधिकारः]

ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यामः ॥ ३।३७ ॥

दे० ज्योतिष्टोमे दीक्षाप्रभृति दीक्षात आरभ्य सर्वाङ्गानां प्रधानानां च ऋषिदैवतछन्दांसि वक्ष्यामः । अमन्त्ररूपाणामपि दीक्षादिकर्मणामुदयनीयातिरात्रान्तानामृष्यादिज्ञानात्फलविशेषो भवति ।

तथा च श्रूयते—यद्वै दीक्षन्तेऽग्नाविष्णू एव देवते यजन्तेऽग्नाविष्णू देवते भवन्ति अग्नाविष्ण्वोः सायुज्यं सलोकतां जयतीत्यादि स पापीयान् भवति श्रेयांस आत्मनेत्यन्तम्। अत्राहुर्हरिस्वामिनः—एतदपि कर्मसु देवताविद्याब्राह्मणं प्रसन्नमेव। अग्नाविष्णू देवते भवन्त्यभेदर्शिनः। अग्नाविष्ण्वोः सायुज्यं सलोकतां जयन्ति देवदर्शिनः। तत्रापि प्रकृष्टविद्याः सायुज्यं जयन्ति, मन्दविद्याः सलोकतामिति विशेषः। एवमुत्तरत्रापि वाच्यम्।

दीक्षायां भृगुरग्नाविष्णू गायत्री ॥ ३।३८ ॥

दे० दीक्षायां भृगुर्ऋषिः अग्नाविष्णू देवते गायत्री छन्दः।

प्रायणीय आङ्गिरसोऽदितिरुष्णिक् ॥ ३।३९ ॥

दे० प्रायणीये आङ्गिरस ऋषिः अदितिर्देवता उष्णिक् छन्दः।

क्रये विश्वामित्रः सोमोऽनुष्टुप् ॥ ३।४० ॥

दे० सोमक्रये विश्वामित्र ऋषिः सोमो देवता अनुष्टुप्छन्दः।

आतिथ्ये वसिष्ठो विष्णुर्बृहती ॥ ३।४१ ॥

दे० आतिथ्ये कर्मणि वसिष्ठ ऋषिः विष्णुर्देवता बृहती छन्दः।

प्रवर्ग्ये कश्यप आदित्यः पङ्क्तिः ॥ ३।४२ ॥

दे० प्रवर्ग्ये कश्यप ऋषिः आदित्यो देवता पङ्क्तिश्छन्दः।

उपसत्स्वात्रेय उपसद्देवता त्रिष्टुप ॥ ३।४३ ॥

दे०उपसत्स्वात्रेय ऋषिः उपसद्देवता त्रिष्टुप्छन्दः।

अग्नीषोमीयेऽगस्त्योऽग्नीषोमौ जगती ॥ ३।४४ ॥

दे० अग्नीषोमीयेऽगस्त्य ऋषिः अग्नीषोमौ देवते जगती छन्दः।

प्रायणीयेऽतिरात्र आग्निवेश्योऽहोरात्रे अतिजगती ॥३।४५॥

दे० प्रायणीयेऽतिरात्रे आग्निवेश्य ऋषिः, अहोरात्रे देवते, अतिजगती छन्दः।

चतुर्विंशत्यहे सौकरायणः संवत्सरः शक्वरी ॥ ३।४६ ॥

दे० चतुर्विंशत्यहे सौकरायण ऋषिः, संवत्सरो देवता, शक्वरी छन्दः।

अभिप्लवे षडहे सावर्णो-(सौपर्णो)ऽर्धमासा मासाश्चातिशक्वरी ।३।४७।

दे० अभिप्लवे षडहे सावर्ण ऋषिः, अर्द्धमासा मासाश्च देवताः, अतिशक्वरी छन्दः।

पृष्ठ्ये षडहे सायङ्कायन ऋतवोऽष्टिः ॥ ३।४८ ॥

दे० पृष्ठ्ये षडहे सायकायन ऋषिः, ऋतवो देवता, अष्टिश्छन्दः।

अभिजिति प्रियघृतो-(व्रतो)ऽग्निरत्यष्टिः ॥ ३।४९ ॥

दे० अभिजिति प्रियव्रत ऋषिः, अग्निर्देवता, अत्यष्टिश्छन्दः।

स्वरसामसु सरस्वत्यापो धृतिः ॥ ३।५० ॥

दे० स्वरसामसु सरस्वती ऋषिः, आपो देवता, धृतिश्छन्दः।

विषुवति रौहिणायन आदित्योऽतिधृतिः ॥ ३।५१ ॥

दे० विषुवति रौहिणायन ऋषिः, आदित्यो देवता, अतिधृतिश्छन्दः।

विश्वजिति सौभर इन्द्रः कृतिः ॥ ३।५२ ॥

दे० विश्वजिति सौभर ऋषिः, इन्द्रो देवता, कृतिश्छन्दः।

गोआयुषो वाष्कलिर्मित्रावरुणौ प्रकृतिः ॥ ३।५३ ॥

दे० गोआयुषोर्वाष्कलिर्ऋषिः, मित्रावरुणौ देवते, प्रकृतिश्छन्दः।

दशरात्र आचार्यो विश्वेदेवा आकृतिः ॥ ३।५४ ॥

दे० दशरात्रे आचार्य ऋषिः, विश्वेदेवा देवताः आकृतिश्छन्दः।

(द्वा)दशरात्रिके पृष्ठ्ये षडहे भाल्लवेयो दिशो विकृतिः ॥३।५५॥

दे० (द्वा)दशरात्रिके—दशरात्रसम्बन्धिनि पृष्ठ्ये षडहे भाल्लवेय ऋषिः, दिशो देवताः, विकृतिश्छन्दः।

छन्दोमेषु शौल्बायन इमे लोकाः संकृतिः ॥ ३।५६ ॥

दे० छन्दोमेषु शौल्बायन ऋषिः, इमे लोका देवताः, सकृतिश्छन्दः।

दशमेऽहनि पराशरः संवत्सरोऽभिकृतिः ॥ ३।५७ ॥

दे० दशमेऽहनि अविवाक्ये पराशर ऋषिः, संवत्सरो देवता, अभिकृतिश्छन्दः।

महाव्रते शैलिनः प्रजापतिरुत्कृतिः ॥ ३।५८ ॥

दे० महाव्रते शैलिन ऋषिः, प्रजापतिर्देवता, उत्कृतिश्छन्दः ।

उदयनीयेऽतिरात्रे भौवायनो वायुश्छन्दांसि सर्वाणि ॥ ३।५९ ॥

दे० उदयनीये अतिरात्रे भौवायन ऋषिः, वायुर्देवता, सर्वाणि-गायत्र्यादीन्युत्कृतिपर्यन्तानि छन्दांसि ।

[मन्त्रर्षिदेवतोत्परीक्षाधिकारः]

ऋषिभिरुपलक्षितं वाक्यम्[1] ॥ ३।६० ॥

दे० ऋषिभिः परमेष्ठ्यादिभिर्मन्त्रवाक्यमुपलक्षितं ज्ञापितं विद्यमानमेव प्रकटीकृतम् ।

ऋषयश्छन्दोभिरुपलक्षिताः ॥ ३।६१ ॥

दे० परमेष्ठ्यादय ऋषयश्च 'तत एतं परमेष्ठी प्रजापत्यो यज्ञमपश्यद्दर्शपूर्णमासौ, इत्यादिभिश्छन्दोभिर्वेदवाक्यैरुपलक्षिताः ज्ञापिताः[2] ।

देवता मन्त्रवर्णाद् ऋग्यजुषोर्विनियोगतश्च विज्ञेयाः ॥ ३।६२ ॥

दे० ऋग्यजुषयोर्मन्त्रवर्णाद्ऋग्यजुषयोर्विनियोगाच्च मन्त्राणां देवता ज्ञेयाः । मन्त्रवर्णात्तावत्—इन्द्रो वीर्यमकृणोदित्येवमादौ, विनियोगाच्च यथा—निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठत इति । अत्र गार्हपत्योपस्थाने विनियोगादस्या गार्हपत्योऽग्निर्देवतेति ज्ञेयम् ।

सर्वमेतच्छन्दो दैवतमार्षं च विज्ञाय यत्किञ्चिज्जपहोमादि करोति तस्य फलमश्नुते ॥ ३।६३ ॥

दे० एतच्छन्दो दैवतमार्षञ्च विज्ञाय विशेषतो ज्ञात्वैवास्य मन्त्रस्यायम् ऋषिः इयं देवता इदं छन्दः इत्येवं ज्ञात्वैव यत्किञ्चिज्जपहोमयागाध्ययनाध्यापनयाजनादिकं कर्म करोति तस्य कर्मणः फलमश्नुते प्राप्नोति, नान्यथा ।

---

१. अपौरुषेयमिति शेषः, मन्त्र इत्यभिप्रायः ।

२. नैतद् व्याख्यानं युज्यते । उत्तरत्र फलश्रुतौ छन्दःपदेन गायत्र्यादयो ज्ञाप्यन्ते, अत्र तु वेदवाक्यमिति विरोधः ।

[छन्दःपुरुषन्यासाधिकारः]

ब्रह्मयज्ञारम्भे यथाविधि स्नात्वा छन्दःपुरुषमेनोनिर्णोदनं शरीरे न्यसेत् ॥ ३।६४ ॥

दे० ब्रह्मयज्ञारम्भे स्वाध्यायारम्भे यथाविधि, अथातो नित्यस्नानं नद्यादावित्यत्रोक्तप्रकारेण स्नात्वा स्नानं कृत्वा छन्दःपुरुषं वेदपुरुषमेनोनिर्णोदनं पापभयकरं सर्वोपद्रवनाशनं शरीरे न्यसेत्, स्वदेहे न्यसेत् ।

कीदृशश्छन्दःपुरुष इत्यपेक्षायां तत्स्वरूपमाह—

तिर्यग्बिलश्चमस ऊर्ध्वबुध्नः ॥ ३।६५ ॥

दे० तस्य छन्दःपुरुषस्य तिर्यग्बिलस्तिर्यक्छिद्रमिदमेव शिरश्चमसः चम्यन्तेऽह्यनेन रसा इति चमसः, कीदृशः ऊर्ध्वबुध्नः ऊर्ध्वबन्धनः उपरि ह्यवस्थितमेतद्बन्धनमस्य शरीरस्य । एतद्वियोगे हि विस्रस्यते शरीरमनेनास्य शिर उक्तम् । एवंविधमेतच्छन्दःपुरुषस्य शिरः, तस्य मुखे न्यासः कर्तव्यः । तिर्यक् बिलं मुखं यस्य स तथा । ऊर्ध्वं बुध्नं यस्य स तथा । श्रुतिरप्यमुमेवार्थमाह 'अर्वाग्बिलश्चमस ऊर्ध्वं बुध्नमितीदं तच्छिर एष ह्यर्वाग्बिलश्चमस उर्ध्वबुध्नः' इति ।

तस्याक्षिणी गोतममरद्वाजौ ॥ ३।६६ ॥

दे० तस्य छन्दःपुरुषस्य (अक्षिणी)गौतमभरद्वाजावृषी ज्ञेयौ ।

तत्र न्यासे प्रकारद्वयम्—मुखं स्पृष्ट्वा तिर्यग्बिलश्चमस ऊर्ध्वबुध्नं, इति पठितव्यम्, अक्षिणी स्पृष्ट्वा गौतमभरद्वाजाविति । एकोऽयं प्रकारः । मुखं स्पृष्ट्वा तिर्यग्बिलाय चमसायोद्ऊर्ध्वबुध्नाय नमः, अक्षिणी स्पृष्ट्वा गौतमभरद्वाजाभ्यां नमः इति । ततश्च यथारुच्यनुष्टेयम् । एवं वक्ष्यमाणेष्वपि प्रकारद्वयं द्रष्टव्यम् ।

श्रोत्रे विश्वामित्रजमदग्नी ॥ ३।६७ ॥

दे० तस्य छन्दःपुरुषस्य विश्वामित्रजमदग्नी श्रोत्रे कर्णौ ।

नासिके वसिष्ठकश्यपौ ॥ ३।६८ ॥

दे० तस्य छन्दःपुरुषस्य वशिष्ठकश्यपौ नासिके ज्ञेये ।

वागत्रिः ॥ ३।६९ ॥

दे० अत्रिर्ऋषिस्तस्य वाग् ज्ञेया।

गायत्रीं छन्दोऽग्निदेवतां शिरसि विन्यसेत् ॥ ३।७० ॥

दे० ततो गायत्रीं छन्दोग्निदेवतां शिरसि विन्यसेत्। गायत्र्यै नमोऽग्नये नम इति।

एवमेवोष्णिहं सवितारं ग्रीवासु[1] ॥ ३।७१ ॥

दे० विन्यसेदिति शेषः। उष्णिहं छन्दः सवितारं देवतामेवमेव ग्रीवासु विन्यसेत्। उष्णिहे नमः सवित्रे नम इति।

अनूके बृहतीं बृहस्पतिम् ॥ ३।७२ ॥

दे० बृहतीछन्दो बृहस्पतिदेवताश्चानूके पृष्ठवंशे विन्यसेत्। बृहत्यै नमो बृहस्पतये नम इति।

बाह्वोर्बृहद्रथन्तरे (पंक्ति ?) द्यावापृथिवीम् ॥ ३।७३ ॥

दे० बृहद्रथन्तरे छन्दसी बाह्वोर्न्यसेत्। बृहद्रथन्तराभ्यां नमो द्यावापृथिवीभ्यां नम इति।

मध्ये त्रिष्टुभमिन्द्रम् ॥ ३।७४ ॥

दे० मध्ये उदरे त्रिष्टुभं छन्द इन्द्रं देवतां न्यसेत्। त्रिष्टुभे नम इन्द्राय नम इति।

श्रोण्योर्जगतीमादित्यम् ॥ ३।७५ ॥

दे० जगतीं छन्द आदित्यं देवतां श्रोण्योः कट्योर्न्यसेत्। जगत्यै नम आदित्याय नम इति।

मेढ्रेऽतिच्छन्दसं प्रजापतिम् ॥ ३।७६ ॥

दे० अतिच्छन्दसं छन्दः प्रजापतिं देवतां मेढ्रे शिश्ने न्यसेत्। अतिच्छन्दसे नमः प्रजापतये नम इति।

१. अत्र 'एवमेव' इति पृथक्सूत्रमित्येके।

पायौ यज्ञायज्ञियं वैश्वानरम् ॥ ३।७७ ॥

दे० यज्ञायज्ञियं छन्दो वैश्वानरं देवतां पायावपाने न्यसेत्। यज्ञायज्ञियाय नमो वैश्वानराय नम इति।

ऊर्वोरनुष्टुभं विश्वान् देवान् ॥ ३।७८ ॥

दे० अनुष्टुभं छन्दो विश्वान्देवान् देवता ऊर्वोः सक्थ्नोर्न्यसेत्। अनुष्टुभे नमो विश्वेभ्यो देवेभ्यो नम इति।

अष्ठीवतोः पङ्क्तिं मरुतः ॥ ३।७९ ॥

दे० पङ्क्तिश्छन्दो मरुतो देवता अष्ठीवतोर्जान्वोर्न्यसेत्। पङ्क्त्यै नमो मरुद्भ्यो नम इति।

पादयोर्द्विपदां विष्णुम् ॥ ३।८० ॥

दे० द्विपदां छन्दो विष्णुं देवताश्च पादयोर्न्यसेत्। द्विपदाय नमो विष्णवे नम इति।

प्राणेषु विच्छन्दसं वायुम् ॥ ३।८१ ॥

दे० प्राणेषु चक्षुःश्रोत्रादिषु सर्वेषु प्राणेषु प्राणायतनेषु विच्छन्दसं वायुञ्च न्यसेत्। विच्छन्दसे नमो वायवे नम इति।

न्यूनातिरिक्तेष्वङ्गेषु न्यूनाक्षरं छन्द आपो देवताम् ॥ ३।८२॥

दे० न्यूनाक्षरं छन्द आपो देवता न्यूनातिरिक्तेष्वङ्गेषु न्यसेत्। न्यूनाक्षराय छन्दसे नमोऽद्भ्यो नम इति च।

एव सर्वाङ्गेषु योजयित्वा वेदमयः सम्पद्यते ॥ ३।८३ ॥

दे० एवममुना प्रकारेण सर्वाङ्गेषु सर्वेषु शिरोग्रीवादिष्ववयवेषु योजयित्वा छन्दोदेवतन्यासं कृत्वा स्वयं वेदमयः सम्पद्यते वेदरूपो भवति।

शापानुग्रहसमर्थो भवति ॥ ३।८४ ॥

दे० तव धनादिहानिर्भवत्वित्येवमादिरूपशापेषणायां तथा तव पुत्रधनविद्यादिसम्पत्तिर्भवत्वित्येवमादिरूपे अनुग्रहे शोभनेषणायाञ्च समर्थो भवति।

ब्राह्मं तेजश्च वर्धते ॥ ३।८५ ॥

दे० अस्य ब्राह्मं तेजो ब्रह्मवर्चसं वर्द्धते ।

न कुतश्चिद् भयं विन्दते ॥ ३।८६ ॥

दे० अयं कुतश्चिदपि चोरव्याघ्रादेर्भयं न विन्दते न प्राप्नोति ।

ऋङ्मयो यजुर्मयः साममयस्तेजोमयो ब्रह्ममयोऽमृतमयः सम्भूय ब्रह्मैवाभ्येति ॥ ३।८७ ॥

दे० ऋगादिरूपो भूत्वा ब्रह्मैवाभ्येति मुक्तिं प्राप्नोतीत्यर्थः ।

तस्मादेतन्नाब्रह्मचारिणे, नातपस्विने, नासंवत्सरोषिताय नाप्रवक्त्रेऽनुब्रूयात् ॥ ३।८८ ॥

दे० तस्मात्कारणादेतत्पूर्वोक्तमृष्यनुक्रमणमब्रह्मचारिणे न ब्रूयात् । अतपस्विने च न ब्रूयात् । तपो विद्यते यस्यासौ तपस्वी, अतपस्विने न ब्रूयात् । तथाऽसंवत्सरोषिताय यः संवत्सरं समीपे नोषितो न स्थितस्तस्मा एतन्न ब्रूयात् । तथाऽप्रवक्त्रे यः स्वयं ज्ञात्वाऽन्यान्न पाठयति तस्मै च नानुब्रूयात् ।

अनेनाधीतेन चान्द्रायणाब्दफलमवाप्नोति ॥ ३।८९ ॥

दे० अनेन सर्वानुक्रमणिकाख्येन ग्रन्थेनाधीतेन पठितेन चान्द्रायणाब्दस्य फलमवाप्नोति प्राप्नोति । चान्द्रायणव्रतसम्बन्धी, अब्दः संवत्सरश्चान्द्रायणाब्दः । संवत्सरं चान्द्रायणव्राताचरणेन यावत्फलं तावदेतद्ग्रन्थाध्ययनमात्रेण प्राप्नोतीत्यर्थः ।

अनेन च सम्यग्ज्ञातेन ब्रह्मणः सायुज्यं सलोकतामाप्नोत्याप्नोति ॥ ३।९० ॥

दे० अनेन च प्रागुक्तेन ग्रन्थेन सम्यक्ज्ञातेन यथार्थं बुद्धेनावगतेन ब्रह्मणः सायुज्यं सलोकतामाप्नोति । अत्रापि प्रकृतविद्यः सायुज्यं प्राप्नोति मन्दतरः सलोकतामिति विशेषः । द्विरभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः ।

इति श्रीत्रिरग्निचित्सम्राट्स्थपतित्रिशत्क्रतुकृन्महायज्ञिक-श्रीप्रजापतिसुत-महायाज्ञिक-श्रीदेवकृतेऽनुक्रमणीव्याख्याने चतुर्थोऽध्यायः ।

मिश्रेण श्रीकिशोरेण सर्वप्रथमतः कृतः ।
कातीयछन्दःसूत्राणां प्रकाशः पूर्णतामगात् ॥

●

परिशिष्टभागः

● कात्यायनोक्तच्छन्दसां विवरणम्

● माध्यन्दिनीयछन्दसामुदाहरणसूची

परिशिष्टम्-१

कात्यायनोक्तच्छन्दसां विवरणम्

अत्रानुसन्धित्सूनां सौकर्याय कात्यायनसूत्रेषु प्रतिपादितानां छन्दसां विवरणमुपस्थाप्यते। तत्रायं क्रमः—(१) क्रमसंख्या (२) छन्दसः संज्ञा (३) यथार्हं क्रमशः प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठ-पादेष्वक्षरसंख्या कोष्ठके (४) विशेषश्चेति। तत्र विशेषे तुलनार्थं छन्दोनाम, उदाहरणस्थलानि ऋङ्माध्यन्दिनीयसामसंहितासु निर्दिष्टानि। इत्यादिना पूरणार्थम् इ, निचृदर्थं नि, भुरिगर्थं भु, स्वराड्विशेषणार्थं च स्व, इत्येवं संकेताः सन्ति।

१. त्रिपदा गायत्री (८,८,८) द्र० त्रिपदार्षी गायत्री (अथ०सर्वा०पृ०६)
२. पदपंक्तिर्गायत्री (५,५,५,५,६) द्र०ऋ० ४।१०।२ इ०, मा० १५।४५इ.
३. पदपंक्तिर्गायत्री (५,५,५,४,६) द्र० पञ्चपदा पदपंक्तिः, पदपंक्तिः (उ) द्र०ऋ० ४।१०।१ इ. मा० १५।४४ इ०
४. उष्णिग्गर्भा गायत्री (६,७,११) द्र०ऋ० ८।२५।२३
५. पादनिचृद्गायत्री (७,७,७) द्र०ऋ० ४।३१।३, मा० २७।४१
६. अतिनिचृद्गायत्री (७,६,७) द्र०ऋ० ६।४५।२९
७. यवमध्या गायत्री (७,१०,७) द्र०ऋ० ९।१०८।१३
८. वर्धमाना गायत्री (६,७,८) द्र०ऋ० ८।८३।७ इ०, मा० ३३।४७ इ० सा० पू० १।१।२
९. प्रतिष्ठा गायत्री (८,७,६) द्र०ऋ० १।२३।२१, मा० ४।१६ इ०
१०. ह्रसीयसी गायत्री (६,६,७)
११. त्रिपदोष्णिक् (८,८,१२) द्र० परोष्णिक् द्र०ऋ०१ ७९।४ मा०१५।३५
१२. पुर उष्णिक् (१२,८,८) द्र०ऋ० १।२३।१९ इ०,मा० ९।६ इ०
१३. ककुबुष्णिक् (८,१२,८) द्र०ऋ० ८।१९।१९, मा० १५।३८
१४. ककुम्न्यंकुशिरा उष्णिक् (११,१२,४) द्र०ऋ० ८।४६।१५
१५. तनुशिरा उष्णिक् (११,११,६) द्र०ऋ० १।१२०।५
१६. पिपीलिकमध्योष्णिक् (११,६,११) द्र० विराड्गायत्री ककुद्मती, ऋ० १०।१०५।२, मा० २७।२२
१७. अनुष्टुब्गर्भोष्णिक् (५,८,८,८) द्र०ऋ० १।१८७।१, मा० ३४।७
१८. उष्णिक् (७,७,७,७) द्र०ऋ० ८।६९।२ मा० ३।६२
१९. अनुष्टुप् (८,८,८,८) द्र०ऋ० ४।३९।६ मा० २३।३२
२०. महापदपंक्तिः अनुष्टुप् (५,५,५,५,५,६) द्र०ऋ० ४।१०।५
२१. कृतिरनुष्टुप् (१२,१२,८) द्र०ऋ० १।१२०।८
२२. पिपीलिकमध्या कृतिरनुष्टुप् (१२,८,१२) द्र०ऋ० ९।११०।१ नि० मा० २२।१८ नि०इ०

२३. काविराडनुष्टुप् (९,१२,९) द्र०ऋ० १।१२०।३
२४. नष्टरूपानुष्टुप् (९,१०,१०) द्र०ऋ० १।१२०।४, मा० ७।१ नि०
२५. विराडनुष्टुप् (१०,१०,१०) द्र० विराट्पंक्तिः (उ०) द्र०ऋ० ७।२२।४ मा० १७।७६ इ०
२६. विराडनुष्टुप् (११,११,११) द्र० त्रिपदा विराड्गायत्री (अ०स०पृ० ४) विराट्पंक्तिः(उ)द्र०ऋ० ३।२५।४, मा०१८।३६ इ०, सा०पू० १।७।१०
२७. (पथ्या) बृहती (८,८,१२,८) द्र० पथ्या बृहती, सिद्धा बृहती (उ०) द्र०ऋ० ७।१६।१ इ०, मा० १५।३२ इ०, सा० पू० १।४।१
२८. पुरस्ताद् बृहती (१२,८,८,८) द्र०ऋ० १०।९३।१५, मा० ४।२८ इ०
२९. न्यङ्कुसारिणी बृहती (८,१२,८,८) द्र०ऋ०१०।१३२।१, मा०३।३९भु
उरोबृहती ,,
स्कन्धोग्रीवी बृहती ,,
३०. उपरिष्टाद्बृहती (८,८,८,१२) द्र० ऋ० ८।८९।१ मा० २०।३० सा० पू० ३।७।६
३१. विष्टारबृहती (८,१०,८) द्र०ऋ० १।१२०।७
३२. ऊर्ध्वबृहती (१२,१२,१२) द्र० सतोबृहती, महाबृहती, विराडूर्ध्वबृहती (ऋ०) द्र०ऋ० ९।११०।४ नि० इ० मा० १२।७ नि०
३३. पिपीलिकमध्या बृहती (१३,८,१३) द्र०ऋ० ८।४६।१४ मा० १७।६७ स्व०, सा० पू० ३।८।३
३४. विषमपदा बृहती (९,८,११,८) द्र०ऋ० ८।४६।२०
३५. बृहती (९,६,६,६) द्र०ऋ० १।१८७।११
३६. पथ्या पंक्तिः (८,८,८,८,८) द्र. त्रिष्टुप् (उ०) पञ्चपदा द्र.ऋ. ५।६।१ मा. १५।४१
३७. विराट्पंक्तिः (१०,१०,१०,१०) द्र०ऋ० ८।९६।४ मा. ८।२५ भु०
३८. सतोबृहती पंक्तिः (१२,८,१२,८) द्र० सतः पंक्तिः, सिद्धा पंक्तिः (उ.) विष्टारपंक्तिः द्र०ऋ० ७।३२।२३ इ. मा. २७।३६ इ०
३९. विपरीताबृहती पंक्तिः (८,१२,८,१२) द्र. विपरीता पंक्तिः (ऋ) सतः पंक्तिः (पि०) द्र०ऋ० ८।४६।१२ मा. ६।३३ नि०
४०. प्रस्तारपंक्तिः (१२,१२,८,८) द्र०ऋ० १०।९३।१, मा. १३।१८ भु०
४१. आस्तारपंक्तिः (८,८,१२,१२) द्र०ऋ० १०।२१।१ मा. ४।२३
४२. संस्तारपंक्तिः (१२,८,८,१२) द्र०ऋ० विरोधः १०।१७२।१
४३. विष्टारपंक्तिः (८,१२,१२,८) द्र० ऋ० विरोधः १०।१४०।५ मा० १२।११०
४४. त्रिष्टुप् (११,११,११,११) द्र०ऋ० ६।१७।१, मा० १।२८

४५. (जागतऋग्गणे) जगती (१२,१२,११,११) द्र० ऋ० १०।२३।४, मा० २५।१७ नि०
४६. (त्रैष्टुभऋग्गणे) त्रिष्टुप् (१२,१२,११,११) द्र०ऋ० १।१६२।१२, मा० २५।३५
४७. अभिसारिणी (१०,१०,१२,१२) द्र०ऋ० १०।२३।५
४८. विराट्स्थाना (९,९,१०,११) द्र०ऋ० १।८९।६ मा० २५।१९
४९. विराट्स्थाना (१०,१०,९,११) द्र०ऋ० १।८९।६ नि०,मा० २५।१९ नि.
५०. विराड्रूपा (११,११,११,८) द्र०ऋ० ५।१९।५, मा. २।२२ भु०
५१. ज्योतिष्मती त्रिष्टुप् (१२,१२,१२,८) द्र० उपरिष्टाज्ज्योतिः, अष्टाक्षरपादस्य क्वाचित्कता
५२. पुरस्ताज्ज्योतिस्त्रिष्टुप् (८,१२,१२,१२) द्र० मा० १७।७४
५३. मध्येज्योतिः (१२,१२,८,१२) द्र०ऋ० ८।१०।२ मा० १९।८२
५४. उपरिष्टाज्ज्योतिस्त्रिष्टुप् (१२,१२,१२,८) द्र.ऋ. ८।३५।१, मा.१२।१११
५५. महाबृहती त्रिष्टुप् (८,८,८,८,१२) द्र० पञ्चपदा जगती (उ०) द्वादशाक्षरपादस्य यत्र क्वचन सत्त्वम् द्र०ऋ० ८।३५।२३ मा० १९।७२
५६. यवमध्या त्रिष्टुप् (८,८,१२,८,८) द्र०ऋ० ६।४८।७
५७. पंक्त्युत्तरा त्रिष्टुप् (१०,१०,८,८,८)
विराट्पूर्वा त्रिष्टुप् (,,) द्र०ऋ० ५।८६।६
५८. जगती (१२,१२,१२,१२) द्र. ऋ. ९।६१।१, मा० १५।२६
५९. महासतोबृहती जगती (८,८,८,१२,१२) द्र० क्रमाभावोऽत्र, द्र० ऋ० ६।४८।६
६०. महापंक्तिर्जगती (८,८,७,६,१०,९) द्र. अत्रापि न क्रमनियमः द्र. ऋ. १।१९१।१०, मा. १८।५५
६१. महापंक्तिर्जगती (८,८,८,८,८,८) द्र. जगतीपंक्तिः (पि.) द्र. ऋ. ८।३७।२, मा. ८।४२
६२. मध्येज्योतिष्मती जगती (१२,८,१२,९२) अ० १०।१।२९
६३. शंकुमती गायत्री (८,५,८) द्र. सा. पू. १।१।२
६४. अक्षरपंक्तिः (५,५,५,५) द्र.सा.पू. ५।१।१,
६५. पदपंक्तिः (५,५,५,५,५) अ० १५।२।२७
६६. अनुष्टुप् ककुम्मती (८,६,८,८) अ० २।३३।३
६७. उपरिष्टाद् बृहती ककुम्मती (८,८,६,१२) अ० ४।३।७३

रणसूचो

६८. अनुष्टुप् ककुम्मती (८,८,६,८) अ० ४।९।२
६९. शंकुमती (अनुष्टुप्) (८,५,८,८) अ० ४।१५।१५
७०. चतुष्पाद्गायत्री (६,६,६,६)
७१. अतिपादनिचृत् (६,८,७)
७२. नागी गायत्री (९,९,६)
७३. वाराही गायत्री (६,९,९)
७४. विराड् गायत्री (१२,८)
७५. त्रिपादनुष्टुप् (८,१२,१२)
७६. बृहती (१०,१०,८,८)
७७. ककुम्मती अनुष्टुप् (६,८,८,८) द्र.ऋ. ८।६३।१, अ० १।१०।३
७८. पिपीलिकमध्या गायत्री (८,४,८) द्र.ऋ. ९।१०७।१६
७९. पुरउष्णिककुम्मती (१२,८,६) अ० १०।६०।२
८०. उष्णिक् शंकुमती (७,७,७,५)अ० १९।४४।४३
८१. पथ्यापंक्तिः शंकुमती (८,८,८,८,५) अ० १९।४३।२
८२. पथ्यापंक्तिः ककुम्मती (८,८,८,८,६) अ० १९।४२।३
८३. उपरिष्टाद्बृहती ककुम्मती (६,८,८,१२) अ० १९।४०।२३

परिशिष्टम्-२

एकाक्षरमारभ्य पञ्चत्रिंशदक्षरं यावन्माध्यन्दिनीयछन्दसामुदाहरणसूची

अक्षरसंख्या	उदाहरणम्
१.	ॐ (मा० सं० ४०।१५)
२.	स्वाहा (मा० सं० ४।६)
३.	इषे त्वा (मा० सं० १।१, २३।८, (४)
४.	वायवः स्थ (मा० सं० १।१, २३।८ (१)
५.	अग्नये स्वाहा २२।६ (९)
६.	वरुणाय स्वाहा २२।६ (१०)
७.	बृहस्पतये स्वाहा २२।६ (८)
८.	विजृम्भमाणाय स्वाहा २२।७ (१९)
९.	वायवे त्वा जुष्टं प्रोक्षामि २२।५ (३)
१०.	इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि २२।५ (२)
११.	प्रजापतये त्वा जुष्टं प्रोक्षामि २२।५ (१)
१२.	सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि २२।५ (४)
१३.	अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु १।१९
१४.	परापूतं रक्षः परापूता अरातयः १।१६, २६।४ (३)
१५.	एष स्य राध्यो वृषा पद्भिश्चतुर्भिरेदगन् २३।१३ (२)
१६.	तेजोऽसि शुक्रममृतमायुष्पा आयुर्मे पाहि २२।१ (१), २३।१९ (१)
१७.	तं बध्नान देवेभ्यः प्रजापतये तेन राध्नुहि २२।४ (३)
१८.	अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् १।२३
१९.	उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि २३।२ (१)
२०.	ब्रह्मन्नश्वं मन्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम् २२।४ (२)
२१.	देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं रक्षत २२।१९ (२)
२२.	देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा १।३ (२)
२३.	देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे २२।१ (३)
२४.	सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः १।१२

R58472

२५. धूरसि·····धूर्वामः १।८
२६. इदमहं तं वल्ग·····निचखान ५।२३
२७. कुक्कुटोऽसि·····जेष्म १।१६
२८. दैव्याय कर्मणे·····वस्तच्छुन्धामि १।१३
२९. कस्त्वा विमुञ्चति·····विमुञ्चति पोषाय २।२३
३०. इन्द्राग्नी·····प्रसवेनापोहामि २।१५
३१. तपसस्तनूरसि·····पुषेयम् ४।२६
३२. मातरिश्वनो घर्मोऽसि·····यज्ञपतिर्ह्वार्षीत् १।२
३३. दीर्घामनु·····पाणिना १।२०, २८।२३ (१)
३४. घृ॒घमसि·····वधाय १।१७, २६।२ (१)
३५. यद्वातो·····मावर्तयामसि नः २३।७

B9051632040

b89051632040a